श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालाया द्वाविंशं पुष्पम्

साहित्यप्रवेशिका

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालाया द्वाविंशं पुष्पम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य अर्हतापरीक्षा (संस्कृतभापाप्रशिक्षण)

पाठ्यपुस्तकरूपेण

प्रणीताऽनिवार्यसंस्कृतसाहित्यबोधिनी

पुस्तिका

साहित्यप्रवेशिका

लेखकाः

प्रा. श्रीतीर्थराजशर्मा सुवेदी

सहप्रा. श्रीलेखनाथशर्मा आचार्यः

सहप्रा. श्रीभागवतप्रसादशर्मा

सम्पादकः

सहप्रा. श्रीदुर्गादत्तशर्मोपाध्यायः

प्रकाशकः

श्रीमहेन्द्रसंस्कृतविश्वविद्यालय

वेलझुण्डी, दाङ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशक :

महेन्द्रसंस्कृतविश्वविद्यालयः

वेलझुण्डी, दाङ्

प्रकाशनम्

प्रथमं संस्करणम्, २०५४ अक्षयतृतीया

प्रकाशितपुस्तकानि - १००० प्रतिरूपाणि

मूल्यम् - ५० रूप्यकाणि

कम्प्यूटरटङ्कणम्

क्वालिटी कम्प्यूटर इन्टिच्यूट

पुतली सडक,काठमाण्डौ

फोन : २२५९३५

मुद्रकः

नेपाल प्रिण्टर्स एण्ड ट्रेडर्स सहकारी लिमिटेड

फोन : ४२७४५६,४१७६७६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्मतिः

नेपालस्य परम्परागतसंस्कृते राष्ट्रभाषाया राष्ट्रियभाषाणामितिहासस्य जनजीवनदर्शनस्य परम्पराया आचारस्य विचारस्याहारस्य विहारस्य साहित्यस्य कलायाश्च सौन्दर्यविधायकं प्राणाधायकं चिरन्तनं रत्नं संस्कृतमेवेति विदितमस्ति सर्वेषाम् । तस्यैव रत्नस्य संरक्षणसंवर्धनप्रचारप्रसारादिकार्यजातैः सर्वत्र नूतनजीवनसञ्चाराय प्रयतमानोऽयं महेन्द्रसंस्कृतविश्वविद्यालयो विविधान् कार्यक्रमान् सञ्चालयन्नस्ति । तेषु संस्कृतभाषाप्रशिक्षणकार्यक्रमोऽन्यतमो वर्तते ।

संस्कृतेतरशिक्षणप्रतिष्ठानेष्वधीयानेभ्यः संस्कृतजिज्ञासुभ्यः प्रशिक्षार्थिभ्यः छात्रेभ्यः संस्कृतसाहित्यस्याधारभूतं ज्ञानं वितरितुं भाषाप्रशिक्षणकार्यक्रमानुसारिपाठ्यपुस्तकस्याभावमनुभूय पूर्वं शिक्षाध्यक्षपदकार्यभारवहनं कुर्वता मया साहित्यविषयविशेषज्ञा विद्वांसोऽभिप्रेरिता आसन् । इदानीं तैः प्रणीतस्य पुस्तकस्य प्रकाशनं जायत इति विज्ञाय नितरां प्रसीदति मे हृदयम् ।

पुस्तकमिदमनुसृत्य युगानुकूलशिक्षणविधिमङ्गीकृत्य मनोविज्ञानञ्चात्मसात्कृत्य शिक्षकाः पाठयेयुः प्रशिक्षार्थिनश्च धैर्यं रुचिं जिज्ञासां श्रद्धाञ्च पुरस्कृत्य पठेयुरेतेन शिक्षकाः शिक्षणे छात्राश्च संस्कृतव्याकरणज्ञानार्जने सफला भविष्यन्तीति मदीयाऽन्तर्मीया सम्मतिरस्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मदीयामिच्छां प्रेरणाञ्च सहर्षमङ्गीकृत्य प्रशिक्षार्थिछात्रजनोपयोगिनः साहित्यप्रवेशिकाभिधस्य पाठ्यपुस्तकस्य लेखकेभ्यो विद्वद्भ्यो धन्यवादाः सन्तु। विविधानि वाधाव्यवधानानि अविगणय्य पाठ्यपुस्तकस्यास्य साधुसम्पादनं टङ्कणप्रारूपशोधनादिकार्यञ्च कृतवते विदुषे सहप्रा. श्री दुर्गादत्तशर्मोपाध्याय-महाभागाय भूरिशः साधुवादान् प्रयच्छामि ।

अन्ते च ग्रन्थस्यास्य शीघ्रतया प्रकाशनेन प्रशिक्षार्थि छात्रहितमाचरद्भ्यो म.सं.वि. शिक्षाध्यक्षेभ्यः प्रा.डा. बाबुरामपोखे्रल-महोदयेभ्यः साधुवादं वितरन् संस्कृतशिक्षाया व्याप्तिं समृद्धिञ्च कामयमानो विरमामि ।

अक्षयतृतीया २०५४

-माधवराजगौतमः
उपकुलपतिः
महेन्द्रसंस्कृतविश्वविद्यालयः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकीयम्

संस्कृतवाङ्मयस्य सर्वतोमुखविकासेन सहैव जनसामान्येऽपि संस्कृतनिष्ठं ज्ञानविज्ञानगतं लाभं प्रापयितुं संस्कृतवाङ्मयगतं धार्मिकं सांस्कृतिकमैतिहासिकं व्यावहारिकं प्राविधिकं सर्वमपि ज्ञानविज्ञानराशिं प्रकाश्य राष्ट्रस्य सर्वविधविकासाय योगक्षेमवहां जनशक्तिमुत्पादयितुं बद्धपरिकरेण विश्वविद्यालयेनानेन तदर्थं बहवः कार्यक्रमाः सञ्चाल्यमानाः सन्ति ।

अथ च विश्वविद्यालयेऽस्मिन्नुत्तरमध्यमकक्षायां प्रविविक्षूणां संस्कृताध्ययनं विना प्रवेशिकापरीक्षोत्तीर्णानां छात्राणां कृते भाषाप्रशिक्षणरूपाया अर्हतापरीक्षायाः कार्यक्रमे स्वीकृतेऽपि एकत्र पाठ्यसामग्रीणामभावाच्छात्रैः शिक्षकैश्च महत् काठिन्यमनुभूयमानमासीत् । तत्समस्यानिराकरणाय वर्तमानैरुपकुलपतिभिः श्रीमाधवराजगौतममहानुभावैः पूर्वमत्र शिक्षाध्यक्षपदभारवहनसमकालमेव साहित्यविषयविशेषज्ञाः पाठ्यपुस्तकनिर्माणाय प्रवर्त्तिता आसन् । तैः प्रणीतं पुस्तकमिदं सम्प्रति प्रकाश्यमानमस्तीति महतः प्रमोदस्य विषयः ।

तत्र प्रथममस्य पुस्तकस्य लेखनसंम्पादनादिसमस्तकार्येषु ससौमनस्यं मूल्यवतीं प्रेरणां प्रयच्छद्भ्य उपकुलपतिमहोदयेभ्यो हार्दिकीं कृतज्ञतां व्यनज्मि ।

पुस्तकस्यास्य लेखने संयोजने च कृतश्रमा अनुभविनो विद्वांसः प्रा श्रीतीर्थराजसुवेदि-सहप्रा. श्रीलेखानाथाचार्य-सहप्रा. श्रीभागवतप्रसादशर्ममहाभागा धन्यवादार्हाः सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथैव पुस्तकस्यास्य सम्पादने टङ्कणप्रारूपशोधनादौ च कृतभूरिप्रयासः सहप्रा. श्रीदुर्गादत्तशर्मोपाध्यायमहाभागश्च धन्यवादार्हः।

अत्रत्यांस्त्रुटीर्न्यूनताश्च निर्दिश्य यथासम्भवं पाठ्यपुस्तकसुधाराय साहाय्यं विधास्यन्ति सम्बन्धिनो विद्वांस इत्याशास्यते ।

यदीदं पुस्तकं सम्बद्धच्छात्राणामन्येषाञ्च संस्कृतजिज्ञासूनां लाभाय स्यात्तदैव विश्वविद्यालयस्यारम्भोऽयं सार्थक्यं लभेत ।

अक्षयतृतीया २०५४

-बाबुरामपोखे्रलः

शिक्षाध्यक्षः

महेन्द्रसंस्कृतविश्वविद्यालयः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्पादकीयम्

वहुमासव्यापिनाऽऽयासेन साहित्यप्रवेशिकेय साधु सम्पाद्य कम्प्यूटरटङ्कणञ्च विधाय प्रकाशमानीतेति प्रसीदति मदीयं मानसम् ।

लेखकैर्विद्वद्भिरत्र गद्यानां पद्यानाञ्चापेक्षितार्थस्य स्फुटत्वमापादयितुं साधु व्याख्यानं विहितमस्ति । शब्दार्थलेखने चावश्यकानां दुर्वोधशब्दानामेव पर्यायाः प्रदत्ताः । अन्यत्रेव सर्वेषां पर्यायदानेन गतानुगतिका शैली नानुकृता समासविग्रहप्रदर्शनमावश्यके स्थले याथातथ्येन कृतम् । भावार्थप्रदशनं सारगर्भितं युक्तियुक्तं हृदयस्पर्शि चास्ति । आर्कपकाणि चाभ्यासोदाहरणानि छात्रमनोविज्ञानानुकूलानि सन्तीति लेखकानां प्रयासः प्रशंसनीयो वर्तते ।

अस्य पुस्तकस्य सम्पादनावसरप्रदायकेभ्यः स्नेहसौजन्यसौहार्दादिगुणमहनीयेभ्य उपकुलपति – श्रीमाधवराजगौतममहोदयेभ्यः शिक्षाध्यक्षप्रा. डा.श्रीवावुरामपोखेल-महोदयेभ्यश्च हार्दिकीं कृतज्ञताकुसुमाञ्जलिमुपहरन् कृतभूरिश्रमेभ्यो लेखकविद्वद्भ्यो धन्यवादं वितीर्य मदीयानुरोधपारवश्यात् कम्प्यूटरटङ्कितस्यास्य पुस्तकस्य प्रकाशनोपयोगिरूपरेखाऽऽकलने महनीयं सहयोगं विदधद्भ्यां विद्वत्प्रवरेभ्यः सुहृद्भ्यः डा. श्रीवेणीमाधवढकालमहानुभावेभ्यः कृतज्ञतारूपमुपहारं समर्पयामि ।

अन्ते च क्वालिटीकम्प्यूटरसंस्थानस्य प्रवन्धकाय श्रीप्रतापवस्न्यातमहोदयाय टङ्कणकार्यकर्त्रे श्रीभरतखतिवडावर्मणे तत्रत्येभ्योऽन्येभ्यः सहयोगिभ्यश्च साधुवादं व्याहरन् वाग्देवीचरणारविन्दयोरात्मानं निवेदयन् विरमामि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषय -सूची

	पाठः	विषयः	पृष्ठम्
१	प्रथमपाठः	वाङ्मयपरिचयः	१
२.	द्वितीयपाठः	वृत्तपरिचयः	१६
३.	तृतीयपाठः	नीतिपद्यानि	३९
४.	चतुर्थपाठः	चाणक्यनीतिः	४९
५.	पञ्चमपाठः	विदुरनीतिः	५३
६.	षष्ठपाठः	हितोपदेशः	६५
७.	सप्तमपाठः	सुभाषितानि	७३
८.	अष्टमपाठः	सूक्तयः	८१
९.	नवमपाठः	चित्रग्रीवहिरण्यककथा	८७
१०	दशमपाठः	बृद्धव्याघ्रपथिककथा	९९
११.	एकादशपाठः	चित्राङ्गक्षुद्रबुद्धिसुबुद्धिकथा	१०२
१२.	द्वादशपाठः	जरद्गवदीर्घकर्णकथा	१०८
१३.	त्रयोदशपाठः	चूडाकर्णवीणाकर्णकथा	११३
१४	चतुदर्शपाठः	भैरवव्याधदीर्घरावजम्बुककथा	११४
१५	पञ्चदशपाठः	कर्पूरतिलकहस्ति-जम्बुककथा	१२०
१६	परिशिष्टम	प्रश्नपत्राणि	११२७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाङ्मयपरिचयः

पाठपरिचयः

वाङ्मयस्य (शास्त्रस्य काव्यस्य च) समान्यज्ञानाय प्रस्तुतेऽस्मिन् पाठे राजशेखरकृतायाः काव्यमीमांसाया विश्वनाथकृतात् सहित्यदर्पणात् अन्यतश्च लक्षणानि समाहृत्य स्थापितानि सन्ति । पाठ्यक्रमानुरोधतः सुवोधतया चानेकेषामाचार्याणां काव्यलक्षणेषु सत्स्वपि काव्यमीमांसाया एव काव्यलक्षणमत्र संगृहीतम् ।

विशेषतया पाठस्यास्याधारः काव्यमीमांसाया द्वितीयोऽध्यायो विद्यते । काव्यमीमांसाया रचयिता राजशेखरो यायावरकुलोत्पन्नः कविराचार्यश्च वर्तते । अयं कान्यकुब्जनरेशस्य महेन्द्रपालस्य राजगुरुरासीदिति अस्य समयो विक्रमस्य दशमशताब्दी निर्धार्यते । अस्य पिता दुर्दकः, माता च शीलवती नाम्नी आसीत् । अस्य पत्न्या नाम अवन्तीसुन्दरी वर्तते या स्वयमपि विदुष्यभूत् । राजशेखरेण बालभारतम् बालरामायणम्, कर्पूरमञ्जरी, विद्धशालभञ्जिका चेति चत्वारि रूपकाण्यपि निर्मितानि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्य काव्यमीमांसा-नामा ग्रन्थः कवीनां समालोचकानाञ्च कृतेऽतीवोपयोगी मन्यते ।

अस्य पाठस्य द्वितीय आधारो विश्वनाथस्य साहित्यदर्पणनामको ग्रन्थो विद्यते । नारायणस्य प्रपौत्रश्चन्द्रशेखरस्य पुत्रो विश्वनाथो विक्रमस्य चतुर्ददशशताब्ध्यामभूत् । साङ्गोपाङ्गस्य साहित्यस्य ज्ञानाय साहित्यदर्पणस्यातीवोपयोगिता विद्यते । एष ग्रन्थः सर्वाङ्गपूर्णः प्रौढस्तर्कयुक्तश्च विद्यते ।

पाठेऽस्मिन् शास्त्रस्य काव्यस्य च सामान्यज्ञानायातीवावश्यकानां तत्वानां संक्षेपेण संग्रहो विद्यते ।

पाठ्यक्रमे निर्धारितानां शीर्षकाणां लक्षणमन्येषाञ्च प्रसङ्गतः परिचयमात्रमत्र न्यस्तमस्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमपाठः

वाङ्मयलक्षणम्-

शास्त्रकाव्यात्मकं रूपं वाचां विस्तृतिरेव वा ।
अथवा विकृतिस्तासां वाङ्मयमिति कथ्यते ॥

शास्त्रकाव्यात्मकं वाक्यस्वरूपं वाक्प्रपञ्चो वा वाङ्मयमित्यभिधीयते। वाचां विकार इति व्युत्पत्त्या वा वाग्विकृतिर्वाङ्मयमुच्यते ।

राजशेखरानुसारेण सर्वमपि पदार्थजातं वाङ्मयविवर्तो वर्तते-

"यदेतद् वाङ्मयं विश्वमर्थमूर्त्या विवर्तते"

वाङ्मयभेदाः

"द्विविधं वाङ्मयं पूर्वं शास्त्रं काव्यञ्च सम्मतम् ।"

प्रथमं हि समस्तमपि वाङ्मयं द्विधा विभाज्यते शास्त्रं काव्यञ्च । तत्र शास्त्रम् अपौरुषेयं पौरुषेयमिति द्विविधम् । काव्यमपि दृश्यं श्रव्यञ्चेति प्रथमं द्विविधम् ।

"शास्त्रेष्वादौ प्रवर्तेत काव्यं तत्पूर्वकं यतः" ।

काव्यज्ञानाय शास्त्राणां ज्ञानमावश्यकं भवति । यतो हि काव्यानि शास्त्रपूर्वकाणि भवन्ति ।

शास्त्रलक्षणम्

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोदीर्यते ऽत्र तच्छास्त्रमभिधीयते ॥

अपौरुषेयेण पौरुषेयेण वा येन पुंसां सन्मार्गे प्रवृतिः कुमार्गाच्च निवृत्तिरुपदिश्यते तच्छास्त्रमुच्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शास्त्रनामनिर्देश:

अपौरुषेयं शास्त्रम्

अपौरुषेयं शास्त्रं कर्तृत्वेन पुरुषसम्बन्धरहितमत एवादुष्टमनवद्यं च भवति। वस्तुतोऽपौरुषेयं श्रुतिरर्थाद् वेदशास्त्रं विद्यते । सा श्रुतिरपि मन्त्रब्राह्मणयोः शब्दराशिरूपा । अतएव मन्त्रात्मिका ब्राह्मणात्मिका चेति द्विविधा भवति ।

तत्र विवृतक्रियातन्त्रा विस्तरेण यागादिप्रतिपादकवेदशाखाभिनिवेशा मन्त्रा उच्यन्ते। मन्त्राणाञ्च स्तुतिनिन्दाव्याख्याविनियोगादिप्रतिपादका ग्रन्था ब्राह्मणानि शतपथगोपथाद्यनेकरूपाणि ।

मन्त्रात्मकः शव्दराशि ऋग्यजुःसामाथर्वभेदेन चतुर्विधोऽर्थात वेदाश्चत्वारः- ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति ।

ऋग्वेदः - अर्थव्यवस्थितपादा ऋच उच्यन्ते ।

सामवेदः - सगीतय ऋच एव सामान्युच्यन्ते ।

यजुर्वेदः - छन्दोगीतिरहितान्यर्थात् गद्यमयानि यजूंष्युच्यन्ते

अर्थर्ववेदः- पद्यमयानि मानवव्यवहारप्रतिपादकानि अथर्वाणि सन्ति ।

उपवेदाः

चत्वार उपवेदाः सन्ति- इतिहासवेदः, धनुर्वेदः, गान्धर्ववेदः, आयुर्वेदश्च।

वेदाङ्गानि

शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दोविचितिः, ज्यौतिषञ्चेति षडङ्गानि सन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. <u>शिक्षा</u>

स्वरव्यञ्जनानां वर्णानामुच्चारणाय स्थानप्रयत्नादिनिष्पत्तिनिर्णायकं शास्त्रं शिक्षा उच्यते । यथा- पाणिनीयशिक्षा, याज्ञवल्क्यशिक्षा, आपिशलीयशिक्षा ।

२. <u>कल्पः</u>

नानाशाखाधीतानां मन्त्राणां विनियोगबोधकं सूत्रं यद्वा यागक्रियानिर्वाहकं शास्त्रं कल्प इत्युच्यते । यथा- कात्यायनसूत्रम्, बौधायनसूत्रम्, आपस्तम्बसूत्रम् ।

३. <u>व्याकरणम्</u>

शब्दानामन्वाख्यानमर्थाद् व्याक्रियन्ते व्युत्पाद्यन्ते असाधुभ्यः साधुशब्दा विविच्यन्तेऽनेनेति व्याकरणम् । शब्दव्युत्पत्याधायकं शास्त्रम् व्याकरणमुच्यते । यथा - पाणिनीयव्याकरणम्, ऐन्द्रव्याकरणम्, चान्द्रव्याकरणमित्यादि ।

४. <u>निरुक्तम्</u> – नामाख्यातोपसर्गनिपात

तात्पर्येण सह शब्दानां निर्वचनं निरुक्तमुच्यते । तद्धि-

" वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन नित्यं तदुच्यते पञ्चविधं निरुक्तम्॥ "

इत्यनुसारेण पञ्चविधम् । यथा- यास्कादिमुनिप्रणीतं निरुक्तम् ।

५. <u>छन्दोविचितिः</u>

छन्दःप्रत्यायकमर्थाद् वैदिकलौकिकानामनुष्टुप्त्रिष्टुबादीनां छन्दसां प्रतिपादकं शास्त्रं छन्दोविचितिः छन्दश्शास्त्रं वोच्यते । यथा- पिङ्गलादिमुनिप्रणीतं पिङ्गलच्छन्दः सूत्रम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

६. ज्यौतिषम्

ग्रहाणां सूर्यचन्द्रादीनां ज्योतिषां गत्यादिप्रतिपादकं शास्त्रं ज्यौतिषशास्त्र -मुच्यते । तद्धि भास्करार्यभट्टादिव्याख्यातम् ।

पौरुषेयं शास्त्रम्

पुरुषकर्तृकं वाङ्मयं पौरुषेयं शास्त्रमुच्यते। तच्च पुराणम्, आन्वीक्षिकी, मीमांसा, स्मृतितन्त्रमिति चतुर्विधं भवति ।

१–पुराणम्

पुराभवं पुराणमथवा पुरा नवं भवतीति व्युत्पत्त्या पुराणशॆब्देन प्राचीनेतिहासो बोध्यते । एतच्च व्यासमुनिप्रणीतं पौरुषेयं शास्त्रमस्ति । पुराणलक्षणं तु–

"सर्ग : प्रतिसंहार: कल्पो मन्वन्तराणि वंशविधि : ।

जगतो यत्र निबद्धं तद् विज्ञेयं पुराणमिति ॥"

जगत : सृष्टि: , प्राणिसृष्टि :, कल्प:,चतुर्दशपरिमितमन्वन्तरका :, मन्वन्तराणिस्वायम्भुवप्रभृतीनां चतुदर्शमनूनामवसरा:,वंशविधि:=सूर्यवंश्यानां चन्द्रवंश्यानां च ब्रह्मर्षिराजर्षिप्रभृतीनां कुलपरम्परा एतत् पञ्चकं यत्र वर्णितं भवति तच्छास्त्रं पुराणमित्युच्यते । तेऽष्टादश सन्ति । आद्यक्षरानुसारेण तेषां संक्षेपतो नामसंग्रह :–

मद्वयं भद्वयं चैब ब्रत्रयं वचतुष्टमय् ।

अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ॥

मत्स्यपुराणम्, मार्कण्डेयपुराणम्, भविष्यपुराणम्, भागवतपुराणम्, ब्रह्मपुराणम्, ब्रह्माण्डपुराणम्, ब्रह्मवैवर्तपुराणम्, वामनपुराणम्,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वायुपुराणम्, वाराहपुराणम्, विष्णुपुराणम्, अग्निपुराणम्, नारदपुराणम्, पद्मपुराणम्, लिङ्गपुराणम्, गरुडपुराणम्, कूर्मपुराणम्, स्कन्दपुराणम् चेति ।

इतिहासः

" धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् ।

पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते ॥ "

इतिहासस्य गतिः प्रवृत्तिर्द्विविधा भवति परिक्रिया पुराकल्पश्च ।

परिक्रिया

एकनायका एक एव विद्यते नायको यस्यामितिहासगत्यां सेतिहासगतिः परिक्रिया इत्युच्यते । यथा- रामायणम् ।

पुराकल्पः

बहुनायका बहवो नायकाः सन्ति यस्यां सेतिहासगतिः पुराकल्प इत्युच्यते । यथा- महाभारतम् ।

२.आन्वीक्षिकी

अनु= पश्चाद् ईक्षा = समालोचनमित्यन्वीक्षा सा प्रयोजनमस्या इत्यान्वीक्षिकी = तर्कविद्या दर्शनानि इति यावत् ।

आन्वीक्षिकी हि पूर्वोत्तरपक्षाभ्यां द्विविधा भवति । तत्र पूर्वपक्षे- अर्हद्दर्शनमर्थात् जैनदर्शनं , भदन्तदर्शनमर्थात् बौद्धदर्शनम् , लोकायतमर्थात् चार्वाकदर्शनं इति त्रीणि दर्शनानि गण्यन्ते ।

उत्तरपक्षेऽपि कपिलमुनिप्रणीतं साङ्ख्यदर्शनं, गौतममुनिप्रणीतं न्यायदर्शनं, कणादमुनिप्रणीतं वैशेषिकदर्शनं चेति त्रीणि दर्शनानि स्थाप्यन्ते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३. मीमांसा

न्यायैर्युक्तिभिर्वेदवाक्यानां विवेचनकर्त्री मीमांसोच्यते । मीमांसाख्ये पौरुषेयशास्त्रे युक्तिभिस्तर्कैश्च वेदार्थस्य वस्तुस्वरूपं निर्णीयते। मीमांसाशास्त्रमपि द्विविधं भवति- पूर्वमीमांसा, उत्तरमीमांसा च ।

पूर्वमीमांसा विधिविवेचनी भवति तत्र कर्मकाण्डस्य विधेर्विचारो विद्यते । उत्तरमीमांसा (वेदान्तशास्त्रम्) तु ब्रह्मणो निर्दर्शिका= वेदान्तवाक्यानां तात्पर्यनिर्णयादिभिर्ब्रह्मणःप्रतिपादयित्री भवति ।

४.स्मृतितन्त्रम्

श्रुत्यर्थस्मरणात् स्मृतिरित्युच्यते । अस्यायमाशयो यत्- स्मृतयः श्रुत्यर्थमनुसरन्ति । स्मृतय एव तन्त्रं शास्त्रं स्मृतितन्त्रं= स्मृतिशास्त्रमुच्यते । स्मृतयोऽपि मनुस्मृतियाज्ञवल्क्यस्मृतिपाराशरस्मृतिप्रभृतयोऽष्टादश भवन्ति ।

अष्टादश विद्याः

(क) चत्वारो वेदाः – ऋग्यजुः सामाथर्वाख्याः ।

(ख) षडङ्गानि – शिक्षाकल्पव्याकरणच्छन्दोविचितिनिरुक्तज्यौतिषाणि ।

(ग) चत्वारिपौरुषेयशास्त्राणि –पुराणमान्वीक्षिकी मीमांसा स्मृतितन्त्रञ्च ।

(घ) (अ) वार्ता- कृषिगोरक्षवाणिज्यकुसीदादिरूपा ।

(आ) कामसूत्रम् ।

(इ) शिल्पशास्त्रम् ।

(ई) दण्डनीतिश्चेति व्यवहारशास्त्राणि चत्वारि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शास्त्रसामान्यलक्षणं तद्भेदाश्च

"सरितामिव प्रवाहास्तुच्छाः प्रथमं यथोत्तरं विपुलाः ।
ये शास्त्रसमारम्भा भवन्ति लोकस्य ते वन्द्याः ॥ "

यथा- नदीनां प्रवाहाः प्रारम्भे स्वल्पा उत्तरोत्तरञ्च वर्धमाना भवन्ति, तथैव यानि शास्त्राणि प्रारम्भे संक्षेपेण निबध्यन्ते कालक्रमेण च विशदतां विस्तृतिञ्च प्राप्नुवन्ति तानि शास्त्राणि लोकश्रद्धास्पदानि भवन्ति । शास्त्रस्यानेकानि रूपाणि संभवन्ति तेषु प्रसिद्धान्यत्र विविच्यन्ते-

१. सूत्रम्

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रकृतो विदुः ॥

सूत्रविदः सूत्रकृतश्च स्वल्पवर्णयुक्तं सन्देहहीनं सुलभान्वयं सारयुक्तं निरर्थकाक्षररहितं निर्दुष्टं यत् शास्त्रवाक्यं तत्सूत्रमिति कथयन्ति । यथा- पाणिनीयव्याकरणसूत्राणि, ब्रह्मसूत्राणिः मीमांसासूत्राणि ।

२. वृत्तिः

सूत्राणां सकलसारविवरणं वृत्तिरर्थात् यत्र सूत्राणां सारांशस्य विवेचनं विद्यते सा वृत्तिरित्युच्यते । यथा- काशिकावृत्तिः ।

३. पद्धतिः

सूत्रवृत्तिविवेचनं पद्धतिरर्थात् यत्र सूत्रस्य सूत्रसारविवरणात्मिकाया वृत्तेश्च विवेचनं भवति सा पद्धतिरित्युच्यते । यथा- भट्टोजिदीक्षितकृता सिद्धान्तकौमुदी ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४. भाष्यम्

आक्षिप्य भाषणाद भाष्यम्, शास्त्रेषु शङ्कामुत्थाप्य सिद्धान्तपक्षत्वेन वस्तुतत्वस्थापनं भाष्यमुच्यते । यथा- पाणिनीयव्याकरणे पातञ्जलभाष्यम्, मीमांसायां शाबरभाष्यम् ।

५. समीक्षा

अन्तर्भाष्यं समीक्षा अर्थाद भाष्ये प्रतिपादितानां गम्भीरविषयाणां विवेचनंसमीक्षा इत्युच्यते । अथ चावान्तरार्थविच्छेदिका अर्थात् सिद्धान्तविवेचनप्रसङ्गे समागतस्यावान्तरार्थस्य पृथक्करणं यत्र भवति साऽपि समीक्षा भवति । यथा - साहित्यदर्पणः, काव्यमीमांसा ।

६. टीका

यथासम्भवमर्थस्य टीकनं टीका । यत्र यथाशक्यं शास्त्रार्थस्य प्रतिपादनं भवति सा टीका इत्युच्यते । यथा - रघुवंशे मल्लिनाथटीका ।

७. पञ्जिका

विषमपदभञ्जिका पञ्जिका । यत्र शास्त्रेषु समागतानां कठोरपदानां भञ्जनं स्पष्टीकरणं भवति सा पञ्जिका कथ्यते ।

८. कारिका

अर्थ प्रदर्शन कारिका कारिका अर्थात यत्र सूत्रार्थ प्रदर्शनं छन्दोबद्धया वाचा विधीयते साकारिका इत्युच्यते यथा कारिकावली ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

९. वार्तिकम्

उक्तानुक्तदुरुक्तचिन्ता वार्तिकम् अर्थात यत्र सूत्रे कथितानामकथितानां कठिनशब्दैः दोषपूर्णतया वा कथितानामर्थानां चिन्तनं भवति तद् वार्तिकमित्युच्यते । यथा कात्यायनवार्तिकम् ।

काव्यमहत्त्वम्

नाट्यवेदः

सर्वैर्वर्णैः पठितुं योग्यः वेदोपवेदानां साररूपः पञ्चमो नाट्यवेदो वर्तते इति महामुनिर्भरतो मनुते ।

सप्तमं वेदाङ्गम्

वेदानामुपकारकत्वात् अलङ्कारः सप्तमं वेदाङ्गमिति राजशेखरो मन्यते ।

पञ्चदशं विद्यास्थानम्

सकलविद्यास्थानैकायतनं काव्यं पञ्चदशं विद्यास्थानम् इति राजशेखरः ।

पञ्चमी साहित्यविद्या

चतसृणां विद्यानां निष्यन्दरूपा पञ्चमी साहित्यविद्येति च राजशेखरः ।

काव्यलक्षणम्

"गुणवदलङ्कृतञ्च वाक्यमेव काव्यम"।

गुणाः = माधुर्यम्, ओजः, प्रसादश्चेति त्रयः । अलङ्काराः = अनुप्रासयमकादयः शब्दगता,उपमारूपकादयश्चार्थगताः।माधुर्यादिगुणयुक्तमनुप्रासोपमाद्यलङ्कारभूषितञ्च वाक्यं काव्यं भवति । यथा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।

कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि ॥

अत्र माधुर्यगुणः, उपमानुप्रासौ चालङ्कारौ वर्तन्ते इति वाक्यमेतत् काव्यम् ।

काव्यभेदाः

प्रथमं काव्यं द्विविधं भवति - दृश्यं श्रव्यञ्च । तत्राभिनेयं काव्यं दृश्यमुच्यते । तद्धि रूपकोपरूपकाभ्यां पुनर्द्विविधं भवति । रूपकाणि नाटकप्रकरणादीनि दश, उपरूपकाणि च नाटिकात्रोटकादीन्यष्टादश भवन्ति। श्रव्यकाव्यन्तु - गद्यपद्यचम्पूभेदेन प्रथमं त्रिविधं भवति ।

गद्यकाव्यलक्षणम्

"वृत्तगन्धोज्झितं गद्यम्"

छन्दोविधानरहितं गुणवदलङ्कृतं वाक्यं गद्यकाव्यमुच्यते । तच्च चतुर्विधं भवति - मुक्तकम्, वृत्तगन्धि, उत्कलिकाप्रायं, चूर्णकं च ।

तत्र मुक्तकं समासरहितं भवति । वृत्तगन्धि - क्वचित् वाक्यांशे छन्दोंऽशेन विशिष्टं भवति । उत्कलिकाप्रायं दीर्घसमासयुतं, चूर्णकञ्च स्वल्पसमासं भवति ।

कथालक्षणम्

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम् ।

क्वचिदत्र भवेदार्या क्वचिद् वक्त्रापवक्त्रके ।

आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम् ॥

मुक्तकादिगद्यविनिर्मिता सरसवस्तुयुता कथा भवति । तत्र क्वचिद् क्वचिद् आर्यावक्त्रापवक्त्रच्छन्दसां प्रयोगोऽपि विधीयते । आदौ मङ्गलाचरणं खलादिचरितवर्णनञ्च पद्यैरेव विधीयते । यथा- कादम्बरी, दशकुमारचरितम्।

अग्निपुराणे गद्यकाव्यस्य पञ्चभेदा दर्शिताः सन्ति- आख्यायिका, कथा, खण्डकथा, परिकथा, कथालिका च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्मिन् पाठ्यपुस्तके प्रस्तुता हिरण्यकलघुपतनकादीनां पशुपक्षिणां कथाः परिकथाः सन्ति ।

पद्यकाव्यलक्षणम्

" छन्दोबद्धपदं पद्यम् "

यस्य वाक्यस्य चतुर्षु चरणेषु विभक्तानि पदानि छन्दोनियमबद्धानि भवन्ति तद् गुणवदलङ्कृतं च वाक्यं पद्यकाव्यम् उच्यते । पद्यकाव्यमपि–

मुक्तकम्, युग्मकं, संदानितकं, कलापकं, कुलकञ्चेति पञ्चविधं भवति ।

तत्र स्वतन्त्रं पूर्णवाक्यात्मकमेकं पद्यं मुक्तकम्, पद्याभ्यां द्वाभ्यामन्वितं युग्मकम्, यत्र त्रिषु पद्येषु एकवाक्यमन्वितं भवति तत् संदानितकम्, चतुर्षु कलापकम्, पञ्चषु तदधिकेषु च पद्येष्वन्वितं कुलकमुच्यते ।

प्रबन्धात्मकं पद्यकाव्यं त्रिविधं भवति । महाकाव्यं, खण्डकाव्यं कोषकाव्यञ्चेति ।

तत्र महाकाव्यं-सर्वाङ्गपूर्ण, विशालं, विशेषलक्षणसमन्वितं भवति । यथा- रामायणं, रघुवंशम् ।

काव्यस्यैकदेशानुसारि खण्डकाव्यमुच्यते । यथा- मेघदूतादि ।

कोषकाव्य- (नीतिकाव्य) लक्षणम्

" कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः । "

कथावस्तुश्रङ्खलारहितं परस्परनिरपेक्षै : पद्यैर्घटितं काव्यं कोषकाव्यम् उच्यते । एतच्च पुनर्द्विविधं भवति।वर्णनपरं नीतिपरञ्च । वर्णनपरं यथा- ऋतुसंहारः भामिनीविलासंश्च । नीतिकाव्यन्तु-परस्परानपेक्षको गुणालङ्कारयुतो नीत्युपदेशपरः पद्यसमूहो नीतिकाव्यमुच्यते । यथा- नीतिशतकम् , चाणक्यनीतिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चम्पूकाव्यम्

"गद्यपद्यमयं काव्यं चम्पूरित्युच्यते ।" यथा- नलचम्पूः भारतचम्पूः ।

उपवेदानां षडङ्गानां च पुरुषकर्तृत्वेन पौरुषेयत्वेऽपि वेदाङ्गत्वेन अपौरुषेयशास्त्रे गणना क्रियते ।

अभ्यासः

प्रश्नाः

१. संक्षिप्तान्युत्तराणि लिखत-

क. वाङ्मयशब्दस्य का व्युत्पत्तिः ?

ख. इदं जगत् कस्य विवर्त्तः ?

ग. काव्यज्ञानाय किम् आवश्यकम् ?

घ. कर्तृत्वेन पुरुषसम्बन्धरहितं कतरत् शास्त्रम् ?

ङ. चतुर्ण्णां वेदानां नामानि लिखत ?

च. उपवेदानां नामानि लिखत ?

छ. कति वेदाङ्गानि कानि च तानि ?

ज. निरुक्तं कतिविधं भवति ?

झ. पुराणस्य किं लक्षणम् ?

ञ. पुराकल्पस्य किमुदाहरणम् ?

ट. पूर्वपक्षे कानि दर्शनानि आयान्ति ?

ठ. पौरुषेयशास्त्रस्य कति भेदाः , के च ते ?

ड. कति विद्या भवन्ति ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ढ. काव्यस्य किं लक्षणम् ?

ण. गद्यस्य किं लक्षणम् ?

त. पद्यस्य किं लक्षणम् ?

थ. परिकथायाः कान्युदाहरणानि ?

द. कोषकाव्यस्य किं लक्षणम् ?

ध. कोषकाव्यं कतिविधम् ?

२. परस्परं मेलयत–

अ.

क. अपौरुषेयम्	क. शिक्षा
ख. सगीतयः	ख. वेदाङ्गम्
ग. पाणिनीया.	ग. द्विविधा
घ. निरुक्तम्	घ. श्रुतिः
ङ. इतिहासगतिः	ङ. सामानि

आ.

क. अर्हद्दर्शनम्	क. काव्यम्
ख. कणादप्रणीतम्	ख. पद्यम्
ग. गुणवदलङ्कृतं च	ग. कोषकाव्यम
घ. छन्दोबद्धम्	घ. पूर्वपक्षः
ङ. नीत्युपदेशकम्	ङ. वैशेषिकम्

=o=

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृत्तपरिचयः

पाठपरिचयः

छन्दसां प्रयोगः प्रथमं वेदेषु अभूत् । लौकिके साहित्ये तु भगवतो बाल्मीकितः छन्दस्वत्या वाण्याः प्रारम्भं मन्यन्ते सुधियः । अतश्छन्दांसि द्विधा विभज्यन्ते - वैदिकानि, लौकिकानि च । छन्दसां प्रतिपादकं शास्त्रं छन्दःशास्त्रमुच्यते, अस्य च छन्दोविचितिः , छन्दोऽनुशासनं, छन्दोमानं, छन्दोविवृतिरित्येतान्यपि नामानि सन्ति ।

संस्कृतवाङ्मये न केवलं काव्यान्येव प्रत्युत गणितज्यौतिषभूगोलशास्त्राणां नियमाः दार्शनिकास्तर्काश्च छन्दःसु लिखिता लभ्यन्त इत्यनेनैव छन्दसां लोकप्रियता अनुमातुं शक्यते । छन्दःशास्त्रस्येतिहासोऽतिप्राचीन : किन्तु सम्यक्तयाऽज्ञातोऽस्ति ।

छन्दःशास्त्रपरम्परा

युधिष्ठिरमीमांसकमतानुसारेण छन्दः शास्त्रस्याद्याचार्यः शिवो वर्तते, ततश्च गुहः, गुहात् सनत्कुमारः, सनत्कुमारात् बृहस्पतिः, ततश्चेन्द्रः, इन्द्रात् शेषः शेषाच्च पिङ्गलः छन्दोज्ञानं लब्धवन्तो व्याख्यातवन्तश्चेति । यद्यपि स्वयं पिङ्गलः स्वकीये छन्दःसूत्रे क्रौष्टुकियास्कताण्डिलसैतवकाश्यपप्रभृतीनामनेकेपा -माचार्याणां नामानि मतानि चोल्लिखति तथापि सम्प्रति समुपलब्धग्रन्थाधारेण पिङ्गल एव छन्दःशास्त्रस्य आद्याचार्यो मन्यते । केचित् पिङ्गलं पतञ्जलिमिव शेषावतारं मन्यन्ते । अन्ये चैनं पतञ्जलेरभिन्नमामनन्ति । इतरे चैनं पाणिनेरनुजं मन्वते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पिङ्गलादनन्तरमनेकेषां छन्दःशास्त्रीयग्रन्थानां रचनाऽभूत् । प्राय एतेषामाधारः पिङ्गलस्य छन्दःसूत्रमेवाभवत् ।

आचार्यभास्कररायकृतः वृत्तचन्द्रोदयः, जनाश्रयप्रणीता जनाश्रयी छन्दोविचितिः, हेमचन्द्रकृतं छन्दोऽनुशासनं, केदारभट्टकृतो वृत्तरत्नाकरः, कालिदासकृतः श्रुतबोधः, क्षेमेन्द्ररचितं सुवृत्ततिलकं गङ्गादासकृता छन्दोमञ्जरी इत्येते ग्रन्थाः छन्दःशास्त्रपरम्परायां सुप्रसिद्धाः सन्ति ।

प्रस्तुते पाठे गुरुलघ्वादिनियमेन सहैव द्वादशानां छन्दसां प्रायो गङ्गादासरचितायाः छन्दोमञ्जर्या लक्षणानि यथासंभवं नीतिशतकाच्चोदाहरणानि संगृहीतानि सन्ति । क्वचित् क्वचित् छात्राणां सौकर्याय स्पष्टतायै च छन्दोमञ्जरीं विहाय कालिदासस्य श्रुतबोधात् केदारभट्टस्य वृत्तरत्नाकराच्च लक्षणान्युद्धृतानि वर्तन्ते ।

द्वितीयः पाठः

वृत्तपरिचयः

छन्दोव्युत्पत्तिः

चन्द्यते आह्लाद्यते मनोऽनेनेति यद्वा चन्द्यते-दीप्यते वाक्यमनेनेति छन्दः। चदि "आह्लादने दीप्तौ च" इत्यतः " चन्देरादेश्च छः " इत्युणादिसूत्रेण असून्प्रत्यये छत्वे च निष्पन्नः छन्दस्शब्दः । लोके तावच्छन्दो द्विविधं भवति- वृत्तं जातिश्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृत्तलक्षणम् - "वृत्तमक्षरसङ्ख्यातम्"

वर्णगणनापरिमितं छन्दो वृत्तमुच्यते । इदं वर्णात्मकत्वात वर्णच्छन्द इत्यप्युच्यते ।

<u>वृत्तभेदाः</u>

"सममर्धसमं वृत्तं विषमञ्चेति तत् त्रिधा ।"

वृत्तमर्थात् वर्णच्छन्दः समवृत्तम् , अर्धसमवृत्तं विषमवृत्तञ्चेति त्रिविधं भवति ।

एकस्मिन् पद्ये चत्वारः पादा भवन्ति । यस्य चतुर्ष्वपि पादेषु समानमेकं लक्षणं भवति । तत्समवृत्तमुच्यते । यथा- इन्द्रवज्रा, शार्दूलविक्रीडितम् ।

यस्य प्रथमतृतीययोरेकं समानं लक्षणं, द्वितीयचतुर्थयोश्चापरं समानं लक्षणं भवति तद् अर्धसमवृत्तमुच्यते । यथा-अपरवक्त्रम् , सुन्दरी ।

यस्य चतुर्ष्वपि चरणेषु प्रत्येकं भिन्नं लक्षणं भवति तत विषमवृत्तमुच्यते। यथा - कलिका, लवली ।

वर्णच्छन्दसि- त्रयाणां वर्णानां गणो भवति ।

जातिलक्षणम् -" जातिर्मात्राकृता भवेत् "

मात्रागणनापरिमिता जातिर्भवति । मात्रात्मिकत्वादस्य मात्राच्छन्द इत्यपरं नाम विद्यते ।

मात्राच्छन्दसि चतसृणां मात्राणां गणो भवति ।

लघुरेकमात्रिकः, गुरुश्च वर्णो द्विमात्रिको मन्यते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरुलघुपरिचयः

गुरुनियमः

"सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः

वा पादान्ते त्वसौ ग्वक्रः ॥

क. दीर्घः - आ, ई, ऊ ॠ, ए, ऐ, ओ, औ, इत्येते गुरवो भवन्ति यथा- आशा, भाषा, मीमांसा ।

ख. सानुस्वारः - अनुस्वारयुक्तो वर्णो गुरुर्भवति । यथा - कंसः, वंशः, हंसः, इत्यादिपु कवहकारेपु स्थिता अकारा अनुस्वारयुक्ततया गुरवो मन्यन्ते।

ग. विसर्गान्तः- विसर्गसहितो वर्णो गुरुर्भवति । यथा- दुःखम्, अतः, प्रातः रामः, इत्यादौ दुः, तः, तः, मः, एतेपु स्थिता उकारोऽकाराश्चगुरवः सन्ति ।

घ. युक्तपरः - यस्य वर्णस्य परतः संयुक्ताक्षरं भवति, सोऽपि गुरूर्जायते । यथा - कक्षा, यज्ञः, सत्रम्, दत्तम्, पत्तिः इत्यादिपु क. य. स. द. प इत्येतेपु स्थिता अकारा ह्रस्वा अपि "क्ष-ज्ञ-त्र-त्त-त्ति" इत्येतेषु संयुक्तेपु परेपु गुरवो जायन्ते ।

ङ. द्विहल्परोऽपि वर्णो गुरुर्जायते । यथा– तत्फलम् ,श्रद्धया, गर्वितम् इत्यादौ तत्पूर्वे वर्णा गुरव : भवन्ति ।

च. वा पादान्ते- पादान्तेऽपि आवश्यकतायां सत्यां लघुरपि गुरुर्मन्यते । यथा-

"निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु" इत्यत्र वसन्ततिलकाया-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्तिमे वर्णे गुरावपेक्षिते पादान्तस्थत्वात् "तु" इत्यत्र "उ" लघुरपि गुरुर्मन्यते ।

गुरुसङ्केतः- अथ चासौ ग्- गुरू, वक्रः कुटिलचिह्नरूपः "ऽ" इत्याकारेण सङ्केतेन प्रस्तूयते ।

लघुपरिचयः

लघुनियमः- **"ज्ञेयोऽन्यो मात्रिको लृजः"**।

अन्यः दीर्घसंयोगपरविसर्गान्तसानुस्वारभिन्नो ह्रस्वो वर्णो लघुर्भवति

क) अ, इ, उ, ऋ, लृ, एते, वर्णा लघवो भवन्ति ।

ख) आवश्यकतायां सत्यां द्वितीयपादस्याद्यक्षरे संयुक्ते सत्यपि प्रथमपादस्यान्तिमो लघुवर्णो चतुर्थस्याद्यक्षरे संयुक्ते तृतीयस्य चान्तिमो लघुवर्णो गुरुर्न भवति ।

" तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥ "

अत्र चतुर्थचरणस्यारम्भे स्थितेन "ग्रा" इत्यनेन तृतीयस्यान्तिमो वर्णो "रि" गुरुर्न भवति । तत्र लघोरेवावश्यकत्वात्, यदि तु गुरुरावश्यकस्तदा गुरुर्भवत्येव । प्रथमद्वितीययोस्तृतीयचतुर्थयोश्चैकवाक्यता स्वीक्रियते तत्र पूर्णविरामस्याभावात् ।

ग. क्वचित् प्+र् =प्र इत्यस्मिन् ह्+र " ह्र" इत्यस्मिंश्च संयोगे परे स्थितेऽपि आवश्यकतायां सत्यां पूर्वस्य लघोर्गुरुता न भवति । यथा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"सा मङ्गलस्नानविशुद्धगात्री गृहीतप्रत्युद्गमनीयवस्त्रा "

अत्र द्वितीयपादे उपेन्द्रवज्रायां "गृहीत" इत्यत्र तकारो लघुरपेक्षित इति परस्थितेन "प्र" इत्यनेन संयोगेन गुरुर्न भवति ।

एवञ्च - "झटिति प्रविश गेहं मा वहिस्तिष्ठ कान्ते ॥"अत्र झटिति प्रविश इत्यत्र "ति " परस्थितेन "प्र" इति संयोगेन गुरुर्न भवति ।

लघुसङ्केतः-लघुवर्णश्च ऋजुरेखारूपः "।" प्रस्तूयते ।

यतिनियमः

यतिलक्षणम् -

"यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यै : पदैर्वाच्या निजेच्छया ॥"

छन्दस उच्चारणे जिह्वया अभीप्सितं विश्रामस्थानं पदच्छेदं यतिं कथयन्ति । विरामः, विश्रामः, विश्रमः, विच्छेदः छेदः, इत्येते यतिपर्यायाः सन्ति ।

यतिः कुत्र भवति -

"यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः ।
समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके ॥"

पादान्ते सर्वत्र विरामो युज्यते । श्लोकार्द्धे विशेषतोऽर्थात् सन्ध्यभावतया स्पष्टविभक्तितयां च यतिर्योजनीया । मध्ये तु पदांन्ते श्रूयमाणविभक्त्या समासान्तर्गततया च अव्यक्तविभक्त्या यतिर्योज्या भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

छन्दःसु यतिनिर्देशाय प्रयुक्ताः संख्यासङ्केतशव्दाः

सङ्केतशब्दाः	अङ्काः	सङ्केतशव्दाः	अङ्काः
चन्द्रः, पृथ्वी	१	अश्वाः,मुनयः, स्वराः लोकाः	७
वाहु, नेत्रे, पक्षौ	२	वसवः, सिद्धयः, नागाः	८
गुणाः, रामाः, कालाः, अग्नयः	३	निधयः, अङ्काः , ग्रहाः	९
वेदाः, वर्णाः युगानि अब्धयः आश्रमाः, धामानि	४	दिशाः, अवतारा :	१०
शराः, इन्द्रियाणि भूतानि	५	रुद्राः	११
शास्त्राणिः रसाः ऋतवः	६	आदित्याः, राशयः, मासाः	१२

गणनियमः

गणमहत्त्वं नामानि च-

"म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥"

यथा भगवता विष्णुना त्रैलोक्यं व्याप्तं तथैव म-य-र-स-त-ज-भ-न- (गणरूपैः) ग-लै- (गुरुलघुवर्णरूपैः) -दशभिरक्षरैः समस्तं छन्दोवाङ्मयं व्याप्तं विद्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गणस्वरूपसूत्रम्-

"यमाताराजभानसलगा:" वर्णछन्दसां मात्राछन्दसां च गणस्वरूपाणि नामानि च निम्नाङ्किताभ्यां तालिकाभ्यां स्पष्टतया बोद्धुं शक्यन्ते -

तालिका- १

वृत्ते अर्थात् वर्णच्छन्दसि त्रयाणां वर्णानामष्टौ गणा भवन्ति ।

गणा:	गणरुपम्	गणनामानि
१– यगण:	य मा ता । S S	आदिलघु : ।
२– मगण :	मा ता रा S S S	सर्वगुरु: ।
३– तगण :	ता रा ज S S ।	अन्त्यलघु : ।
४–रगण:	रा ज भा S । S	मध्यलघु : ।
५– जगण:	ज भा न । S ।	मध्यगुरु: ।
६– भगण :	भा न स S । ।	आदिगुरु : ।
७– नगण	न स ल । । ।	सर्वलघु : ।
८– सगण:	स ल गा : । । S	अन्त्यगुरु: ।
९– लघु	ल ।	१ लघु : ।
१०– गुरु :	गा : S	१ गुरु : ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तालिका –२

मात्राच्छन्दसि चतसृणां मात्राणां पञ्चगणा भवन्ति । गुरुर्द्विमात्रिको लघुश्चैकमात्रिको भवति ।

१– मगण: S S
२+२ = ४ सर्वगुरु : ।

२– भगण: S । ।
२+१+ १ =४ आदिगुरुः ।

३– जगण: । S ।
१+२+१= ४ मध्यगुरुः ।

४– सगण: । । S
१+१+२=४ अन्त्यगुरु : ।

५– नगण: । । । ।
१+१+१+१=४ सर्वलघु : ।

छन्दसो लक्षणानि

१. आर्यालक्षणम्

"यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥"

आर्यानामकस्य जातिच्छन्दसोऽर्थात् मात्राच्छन्दसः प्रथमे चरणे द्वादशमात्रा द्वितीये चरणे अष्टादशमात्रस्तृतीये पुनर्द्वादश चतुर्थे च चरणे पञ्चदश मात्रा भवन्ति । यथा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदचेतनोऽपि पादैः

I IS IS I S S

१+१+२+१+२+१+२+२=१२

स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।

S S S I I I I I I I I S S

२+२+२+१+१+१+१+१+१+१+१+२+२=१८

तत्तेजस्वी पुरुषः

S S S S I I S

२+२+२+२+१+१+२=१२

परकृतनिकृतिं कथं सहते ॥

I I I I I I S I S I I S

१+१+१+१+१+१+२+१+२+१+१+२=१५

२. अनुष्टुब्लक्षणम्-

I S S
श्लोके षष्ठं गुरु ज्ञेयं,

I S I
सर्वत्र लघु पञ्चमम् ।

I S S
द्विचतुष्पादयोर्ह्रस्वं,

I S I
सप्तमं दीर्घमन्ययोः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टाक्षरात्मकेऽस्मिन् छन्दसि चतुर्षु चरणेषु पञ्चममक्षरं लघु, षष्ठं गुरुः सप्तमं तु प्रथमतृतीययोर्गुरु द्वितीयचतुर्थयोर्लघु भवति । शेषेष्वक्षरेषु नियमो नास्ति ।

अस्य छन्दसः "अनुष्टुभ्", वक्त्रम्, श्लोकश्चेति नामत्रयं वर्तते । एतच्च कैश्चिद् मात्राछन्दसि, कैश्चित्तु वर्णच्छन्दसि परिगणितम् । उदाहरणं यथा-

५,६,७
। SS
वरं पर्वत दुर्गेषु
५,६,७
। ऽ ।
भ्रान्तं वनचरैः सह ।
५,६,७
। ऽ ऽ
न मूर्खजनसम्पर्कः ।
५,६,७
। ऽ ।
सुरेन्द्रभवनेष्वपि ॥

३. इन्द्रवज्रालक्षणम्

स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥

ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ

त त ज ग ग

एकादशाक्षरात्मके त्रिष्टुब्जातीये इन्द्रवज्रानामके समवृत्ते चतुर्ष्वपि चरणेषु द्वौ तगणौ (ऽ ऽ ।, ऽ ऽ ।) एको जगणः (। ऽ ।) द्वौ गुरू (ऽ ऽ) च भवन्ति । उदाहरणं यथा-

आहारनिद्राभयमैथुनञ्च,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऽऽ। ऽऽ। ।ऽ। ऽ ऽ
त त ज ग ग

सामान्यमेतत् पशुभिर्नराणाम् ।
ऽऽ। ऽऽ। ।ऽ। ऽऽ
त त ज ग ग

धर्मो हि तेपामधिको विशेपो
ऽऽ।ऽऽ। ।ऽ। ऽ ऽ
त त ज ग ग

धर्मेण हीना : पशुभि : समाना : ॥
SS। SS ।।S ।SS
त त ज ग ग

४ उपेन्द्रवज्रा लक्षणम् - "उपेन्द्रवज्रा जतजा स्ततौ गौ :।"

एकादशाक्षरात्मके त्रिप्टुब्जातीये उपेन्द्रवज्रानामके समवृत्ते चतुर्प्वपि पादेपु क्रमशः जगणः (। ऽ ।) तगणः (ऽऽ।) पुनर्जगणः (। ऽ ।) ततश्च द्वौ गुरू (ऽ, ऽ) भवन्ति ।

उदाहरणं यथा-

त्वमेव माता च पिता त्वमेव
।ऽ। ऽऽ। ।ऽ। ऽऽ
ज त ज ग ग

त्वमेव बन्धुश्च सखा त्वमेव ।
।ऽ। ऽऽ ।।ऽ। ऽऽ
ज त ज ग ग

त्वमेव विद्यां द्रविणं त्वमेव
।S। SS ।।S ।SS
ज त ज ग ग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्वमेव सर्वं मम देव देव ॥

। ऽ । ऽ ऽ । । ऽ । ऽ ऽ

ज त ज ग ग

५. उपजातिःलक्षणम्

अनन्तरोदीरितलक्ष्मभाजौ

। ऽ । ऽ ऽ । । ऽ । ऽ ऽ → उपेन्द्रवज्रा

ज त ज ग ग

पादौ यदीयावुपजातयस्ताः ॥

ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ इन्द्रवज्रा

त त ज ग ग

अव्यवहितोक्तयोश्छन्दसोरिन्द्रवज्रोपेन्द्रवज्रयोर्लक्षणे यदा संगमय्येते तदा उपजातिनामकं छन्दो भवति ।

तच्चतुर्दशविधं भवति-

१. प्रथमपादे इन्द्रवज्रा शेषेषूपेन्द्रवज्रा,

२. प्रथमयोरिन्द्रवज्रा अन्त्ययोरुपेन्द्रवज्रा,

३. आद्येषु त्रिषु इन्द्रवज्रा चतुर्थे उपेन्द्रवज्रा,

४. आद्यन्तयोरिन्द्रवज्रा मध्यमयोरुपेन्द्रवज्रा,

५. प्रथमतृतीययोरिन्द्रवज्रा द्वितीयचतुर्थयोरुपेन्द्रवज्रा,

६. प्रथमद्वितीयचतुर्थेषु इन्द्रवज्रा तृतीये उपेन्द्रवज्रा ,

७. प्रथमतृतीयचतुर्थेषु इन्द्रवज्रा द्वितीये उपेन्द्रवज्रा ,

८. प्रथमेषु त्रिषु उपेन्द्रवज्रा अन्तिमे इन्द्रवज्रा ,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

९. प्रथमयोरुपेन्द्रवज्रा अन्त्ययोरिन्द्रवज्रा,

१०. आद्यन्तयोरुपेन्द्रवज्रा मध्यमयोरिन्द्रवज्रा,

११. प्रथमतृतीयोरुपेन्द्रवज्रा द्वितयिचतुर्थयोरिन्द्रवज्रा,

१२. प्रथमद्वितीयचतुर्थेषु उपेन्द्रवज्रा तृतीये इन्द्रवंज्रा,

१३. प्रथमे उपेन्द्रवज्रा शेषेषु इन्द्रवज्रा,

१४. प्रथमतृतीयचतुर्थेषूपेन्द्रवज्रा द्वितीये इन्द्रवज्रा, ।

यथा दिङ्मात्रमुदाह्रियते-

येषां न विद्या न तपो न दानम् इन्द्रवज्रा

ऽऽ। ऽऽ। ।ऽ। ऽऽ

त त ज ग ग

ज्ञानं न शीलं न गुणो न धर्मः । इन्द्रवज्रा

ऽऽ। ऽऽ। ।ऽ। ऽऽ

त त ज ग ग

ते मृत्युलोके भुवि भारभूता इन्द्रवज्रा

ऽऽ। ऽऽ। ।ऽ। ऽऽ

त त ज ग ग

मनुष्यरूपेण मृगाश्चरन्ति ॥ उपेन्द्रवज्रा

।ऽ। ऽऽ। ।ऽ। ऽऽ

ज त ज ग ग

" इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम " ॥

अथात सजातिकयोरव्यवहितोक्तयोः समानविश्रामयोरन्ययोश्छन्दसोरपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मिश्रणे उपजातिच्छन्दो भवति । यथा- स्वागतारथोद्धतयोः इन्द्रवंशावंशस्थयोश्च ।

६. वंशस्थलक्षणम्

"जतौ तु वंशस्थमुदीरितं जरौ ।"

ISI SSI ISI SIS

ज त ज र

द्वादशाक्षरात्मके जगतीजातीये वंशस्थनामके समवृत्ते प्रत्येकं चरणेषु क्रमशः जगण - (I S I) तगण- (SSI) जगण- (I S I) रगणा (S I S) श्च भवन्ति ।

उदाहरणं यथा-

भवन्ति नम्रास्तरवः फलोद्गमै

ISI SSI ISI SIS

ज त ज र

र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।

ISI SSI ISI SIS

ज त ज र

अनुद्धताः सत्पुरूषाः समृद्धिभिः

ISI SSI ISI SIS

ज त ज र

स्वभाव एवैष परोपकारिणाम् ॥

ISI SSI ISI SIS

ज त ज र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

७. वसन्ततिलकालक्षणम्

उक्ता वसन्ततिलका तभजा जगौ गः ।

ऽऽ। ऽ।।।ऽ । ।ऽ।ऽ ऽ

त भ ज ज ग ग

चतुर्दशाक्षरात्मके शक्वरीजातीये वसन्ततिलकानामके समवृत्ते प्रत्येकं चरणेषु

क्रमश : तगणः (ऽ ऽ।) भगण :(ऽ । ।) जगणद्वयं (। ऽ ।, । ऽ ।) गुरुद्वयं च भवन्ति ।

अस्य छन्दसो ऽन्यान्यपि नामानि सन्ति - सिंहोन्नता,उद्धर्षिणी,मधुमाधवी,मधुमालती च ।

उदाहरणं यथा -

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु

ऽऽ । ऽ।।।ऽ । ।ऽ।ऽ ऽ

त भ ज ज ग ग

लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।

ऽ ऽ। ऽ।। ।ऽ।।ऽ। ऽऽ

त भ ज ज ग ग

अद्यैव वा मरणमस्तु युगान्तरे वा

ऽऽ। ऽ ।।।ऽ। ।ऽ ।ऽऽ

त भ ज ज ग ग

न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥

ऽऽ। ऽ ।।।ऽ। ।ऽ। ऽ ऽ

त भ ज ज ग ग

८.मालिनीलक्षणम्

ननमयययुतेयं मालिनी भोगिलोकैः ।

।।।।।।ऽऽऽ।ऽऽ ।ऽऽ

न न म य य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चदशाक्षरात्मके अतिशक्वरीजातीये समवृत्तान्तर्गते मालिनीनामके छन्दसि प्रत्येकं चरणेषु नगणद्वयं । III, III । मगणः । SSS । ततश्च यगणद्वयं । ISS, ISS । च भवन्ति ।

अत्र भोगिभिरष्टाभिः ततश्च लोकैः सप्तभिः (पादान्ते यावत्) अक्षरैर्यतिर्भवति ।

उदाहरणं यथा-

अधिगतपरमार्थान् पण्डितान् मावमंस्था
III III SSS ISS ISS
न न म य य

स्तृणमिव लघुलक्ष्मीर्नैव तान्संरूणद्धि ।
III III S SS ISS ISS
न न म य य

अभिनवमदलेखाश्यामगण्डस्थलानां

I II III S S S I S S I S S
न न म य य

नभवति विसतन्तुर्वारणं वारणानाम् ॥
III III SSS ISS ISS
न न म य य

९. <u>मन्दाक्रान्तालक्षणम्</u>

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम ।
S S S S I I I I I S S I S S I S S
म भ न त त ग ग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तदशाक्षरात्मके अत्यष्टिजातीये समवृत्तान्तर्गते मन्दाक्रान्तानामके छन्दसि प्रतिचरणं मगणः (ऽऽऽ) भगणः (ऽ॥) तगणद्वयं (ऽऽ।, ऽऽ।) गुरुद्वयं च (ऽ, ऽ) भवन्ति ।

अस्मिन् छन्दसि अम्बुधिभिः चतुर्भिर्वर्णैः, ततश्च रसैः पड्भिर्वर्णै,तदनन्तरं नगैः सप्तभिरक्षरैर्यतिर्भवति ।

उदाहरणं यथा-

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
ऽ ऽऽ ऽ।। ।।।ऽऽ। ऽऽ। ऽ ऽ
म भ न त त ग ग

धृष्टः पाश्र्वे वसति च तदा दूरतश्चाऽप्रगल्भः ।
ऽ ऽऽ ऽ।। ।।। ऽऽ। ऽऽ। ऽऽ
म भ न त त ग ग

क्षान्त्या भीरुर्यदि न सहते प्रायशो नाऽभिजातः
ऽ ऽऽ ऽ।। ।।।ऽऽ।ऽ ऽ। ऽ ऽ
म भ न त त ग ग

सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥
ऽ ऽऽ ऽ।। ।।।ऽऽ। ऽऽ। ऽ ऽ
म भ न त त ग ग

१०. शिखरिणीलक्षणम्

रसैः रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।
।ऽ ऽऽ ऽ ऽ ।।।।।ऽ ऽ ।। । ऽ
य म न स भ ल ग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तदशाक्षरात्मके अत्यष्टिजातीये समवृत्ते शिखरिणीनामके वर्णछन्दसि प्रत्येकं चरणेषु क्रमशः यगणः (।ऽऽ) मगण (ऽऽऽ) नगण (।।।) सगणः (।।ऽ) भगणः (ऽ।।) एको लघुः (।) एको गुरुश्च (ऽ) भवन्ति ।

अस्मिन् छन्दसि रसैः षड्भिः ततश्च रुद्रैरेकादशभिरक्षरैर्यतिर्भवति । षष्ठे सप्तदशे अर्थात् पादान्ते विश्रामो भवति इति भावः । उदाहरणं यथा-

यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
।ऽ ऽ ऽ ऽऽ।। ।। ।ऽऽ ।।।ऽ
य म न स भ ल ग

तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
।ऽ ऽ ऽ ऽऽ।।। । ।ऽऽ।। । ऽ
य म न स भ ल ग

यदा किञ्चित् किञ्चिद् बुधजनसकाशादवगतं
।ऽ ऽ ऽऽऽ ।।। ।।ऽ ऽ।। । ऽ
य म न स भ ल ग

तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥
। ऽ ऽऽऽ ऽ ।। । ।।ऽ ऽ ।।। ऽ
य म न स भ ल ग

११. शार्दूलविक्रीडितलक्षणम्

सूर्याश्वैर्यदिमः सजौ सततगाः शार्दूलविक्रीडितम्
ऽ ऽ ऽ।।ऽ ।ऽ।।।ऽ ऽऽ। ऽऽ। ऽ
म स ज स त त ग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकोनविंशत्यक्षरात्मके अतिधृतिजातीये समवृत्तान्तर्गते शार्दूलविक्रीडितनामके छन्दसि प्रतिचरणं मगणः (SSS) सगणः (IIS) जगणः (ISI) पुनः सगणः (IIS) तगणद्वयम् (SSI, SSI) एकोगुरुश्च (S) भवन्ति ।

अत्र सूर्यैर्द्वादशभिरक्षरैः अश्वैः सप्तभिरक्षरैर्यतिर्भवति । अर्थात् द्वादशाक्षरे ततश्च पादान्ते ऊनविंशेऽक्षरे विश्राम इत्यर्थः ।

उदाहरणं यथा-

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नमन्तर्धनम्
S S S I I S I S I I I S S S I S S I S
म स ज स त त ग

विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
S S S I I S I S I I I S S S I S S I S
म स ज स त त ग

विद्या वन्धुजनो विदेशगमने विद्या परं दैवतं
S S S I I S I S I I I S S S I S S I S
म स ज स त त ग

विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥
S S S I I S I S I I I S S S I S S I S
म स ज स त त ग

१२. स्रग्धरालक्षणम्

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।

S S S S I S S I I I I I I S S I S S I S S
म र भ न य य य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकविंशत्यक्षरात्मके प्रकृतिजातीये समवृत्तान्तर्गते स्रग्धरानामके छन्दसि प्रतिचरणं मगणः (ऽऽऽ) रगणः (ऽ।ऽ) भगणः (ऽ।।) नगणः (।।।) यगणत्रयं च (।ऽऽ, ।ऽऽ,।ऽऽ) भवन्ति ।

अत्र मुनिभिः सप्तभिरक्षरैः त्रिबारं यतिर्भवति अर्थात् सप्तमे, चतुर्दशे पादान्ते च विश्रामो भवतीत्यर्थः ।

उदाहरणं यथा-

स्थाल्यां वैदूर्यमय्यां पचति तिलकणांश्चान्दनैरिन्धनौघैः
ऽऽऽ ऽ।ऽ ऽ। ।।। ।ऽऽ ।ऽऽ ।ऽऽ
म र भ न य य य
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कमूलस्य हेतोः ।
ऽऽऽ ऽ।ऽ ऽ। ।।। ।ऽऽ ।ऽऽ ।ऽऽ
म र भ न य य य
कृत्वा कर्पूरखण्डान् वृत्तिमिह कुरुते कोद्रवाणां समन्तात्
ऽऽऽ ऽ।ऽ ऽ। ।।। ।ऽऽ ।ऽऽ ।ऽऽ
म र भ न य य य
प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः ॥
ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ
म र भ न य य य

=o=

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभ्यासः

प्रश्नाः

१. मात्रावर्णच्छन्दसोः किमनन्तरम् ?

२. मात्राच्छन्दसि कति गणा भवन्ति ?

३. मात्राच्छन्दसि मगणस्य नगणस्य च किं स्वरूपम् ?

४. जगणस्य रगणस्य च किं स्वरूपम् ?

५. शिखरिणीछन्दसः किं लक्षणम् ?

६. मन्दाक्रान्तायां कुत्र कुत्र यतिर्भवति ?

७. उपजातेः कति भेदा भवन्ति ?

८. वसन्ततिलकायां कत्यक्षराणि भवन्ति ?

९. छन्दःशास्त्रे रुद्रशव्देन कति संख्यायाः सङ्केतो भवति ?

१०. स्रग्धरायाः किमुदाहरणम् ?

११. निम्नाङ्किते पद्ये मात्रागणनां कृत्वा छन्दोनिर्धारणं कुरुत-

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥

१२. निम्नाङ्किते पद्ये गणनिर्देशपुरस्सरं छन्दो निर्धारयत-

स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगात् ग्रस्यते राहुणाऽसौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥

१३ " ज्ञेयोऽन्यो मात्रिको लृजुः " इत्यस्य संस्कृते आशयं लिखत ।

१४ अनुष्टुप्छन्दसोऽन्ये द्वे उदाहरणे नीतिपद्येभ्यो सङ्गृह्य लिखत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१५. ।।ऽ, ऽ।।, ऽ।ऽ, ।ऽ। एतेषां गणसङ्केतानां नामानि लिखत ।

१६. उदाहरणेषु प्रस्तुतानां पद्यानां समूहगतरूपेण सस्वरं पाठं कुरुत ।

१७. इन्द्रवज्रोपेन्द्रवज्रयोः कियदन्तरं वर्तते लिखत ।

१८. परस्परं मेलयत-

क. द्वादशे यतिः	क. वंशस्थम्
ख. सर्वगुरुः	ख. आदिलघुः
ग. विसर्गान्तः	ग. शार्दूलविक्रीडिते
घ. यगणः	घ. गुरूः
ङ. द्वादशाक्षरात्मकम्	ङ. मगणः

=o=

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयपाठः

नीतिपद्यानि

पाठपरिचयः

कविर्भर्तृहरिः संस्कृतवाङ्मयस्य निधिरस्तीति नाऽत्रसन्देहः । अन्यैः संस्कृतकविभिरिव भर्तृहरिणापि स्वस्य समयविपये स्वकीयग्रन्थे सूचितं किञ्चिन्न दृश्यते । यद्यपि अस्य कालनिर्णयमादाय विदुपां मतैक्यं नास्ति, तथापि ईशवीयसप्तमशताब्द्यामनेन कविना धरा विभूपिता इत्यत्र बहूनां समालोचकानां मतैक्यमास्ति । भर्तृहरिण साहित्ये, नीतौ, व्याकरणे च स्वकीयया प्रतिभया संस्कृतवाङ्मयस्य भाण्डागारं परिपूरितं दृश्यते । व्याकरणे वाक्यपदीयं, महाभाष्य-दीपिका चेति द्वौ ग्रन्थावस्य सुप्रसिद्धौ स्तः । नीतिसाहित्ये "शतकत्रयम्" (नीतिशतकम्, श्रृङ्गारशतकम्, वैराग्यशतकञ्चेति) संस्कृतजगति सर्वोत्कृष्टं स्वरूपं प्रदर्शयति । वस्तुतो नीतिशतकं ग्रन्थः नीतिविपयकसुभापितानां सङ्ग्रह इति कथयितुं शक्यते । अत एव इदं कोपकाव्यम् । अस्मिन् पाठे भर्तृहरि-नीतिशतकात्समुद्धृतानामप्टानां श्लोकानां समुल्लेखो वर्तते । मानवजीवनस्य समुन्नतये नीतेरावश्यकता भवति ।

तृतीयः पाठः

नीतिपद्यानि

शक्यो वारयितुं जलेन हुतभुक्, छत्रेण सूर्यातपो,
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ॥
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं,
सर्वस्यौषधमस्ति शास्त्रविहितं, मूर्खस्य नास्त्यौषधम् ॥१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थ:- अग्ने:, सूर्यातपस्य, मत्तगजगोगर्दभादीनां, रोगाणां,विपादीनाञ्च प्रशमनोपाया: शास्त्रेपु प्राप्यन्ते परं मूर्खस्य मूर्खत्वपरिहारकमौपधं न कुत्रापि प्राप्यते।

अन्वय:- जलेन हुतभुक् वारयितुं शाक्य:, छत्रेण सूर्यातप: (वारयितुं शक्य :) समद: नागेन्द्र: निशिताङ्कुशेन (वारयितुं शक्य:) दण्डेन गोगर्दभौ (वारयितुं शक्यौ) व्याधि: भेपजसङ्ग्रहैश्च (वारयितुंशक्य:) विविधैर्मन्त्रप्रयोगैर्विपं वारयितुं शक्यम् सर्वस्य औपधं शास्त्रविहितम् आस्ति, (परम्) मूर्खस्य औषधं-नास्ति ।

व्याकरणम् हुतं भुङ्क्ते इति हुतभुक् । " छद अपवारणे " ष्ट्रन् प्रत्यय: छत्त्रम्। सूर्यस्य आतप: सूर्यातप: (प.त.) निशितश्चासौ अङ्कुश: (क. धा. त.) तेन निशिताङ्कुशेन । गौश्च गर्दभश्चेति गोगर्दभौ (द्वन्द:) । भेपजानां सङ्ग्रहै: भेपजसङ्ग्रहै: (प. त.) । मन्त्राणां प्रयोगा: मन्त्रप्रयोगास्तै: मन्त्रप्रयोगै: (प. त.)

कोप:- " हिरण्यरेता हुतभुग् दहनो हव्यवाहन: " इत्यर: । " छत्त्रम् त्वातपत्त्रम् " इत्यमर: । " प्रकाशो द्योत आतप: " इत्यमर: । " रासभा गर्दभा: खरा:" इत्यमर: । " भेपजौपधभैपज्यानि " इत्यमर: ।

शब्दार्था: -

हुतभुक् = अग्नि:	वारयितुं = निराकर्तुम्
आतप: = धर्म:	नागेन्द्र: = गजश्रेष्ठ.
निशिताङ्कुशेन= तीक्ष्णया सृण्या	गोगर्दभौ = वृपभरासभौ
व्याधि: = शरीरस्थो ज्वरादिरोग:	भेपजसङ्ग्रहै = औपधसञ्चयै
विपम्= गरलम्	मूर्खस्य= विवेकशून्यस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नास्ति= न विद्यते । अत्र शार्दूलविक्रीडितवृत्तम् ।

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।

ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति ॥ २॥

भावार्थः विद्यातपोदानज्ञानशीलगुणधर्मरहितानां जनानां जन्म संसारे निरर्थकं भवति ।

अन्वयः येपां न विद्या न तपः न दानं न ज्ञानं न शीलं न गुणः न धर्मः भुवि भारभूताः ते

(जनाः) मर्त्यलोके मनुप्यरूपेण मृगाः चरन्ति ।

व्याकरणम् धरति लोकान् ध्रियते वा जनैरिति "धृ धातोः" मन् प्रत्ययः धर्मः । चर धातोः लटि झि चरन्ति ।

कोषः " शुचौ तु चरिते शीलम् " इत्यमरः । "श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः" इत्यमरः । मृगे कुरङ्गवातायुहरिणा-जिनयोनयः " इत्यमरः ।

शब्दार्थाः

तपः= व्रतोपवासादिकम् ज्ञानम्=हिताहितविवेकः

शीलम्=सदाचारः गुणः=दयादाक्षिण्यादिविशेपः

धर्मः=वेदविहितं कर्म भुवि=पृथिव्याम्

अत्र उपजातिवृत्तम् ॥

विद्या नाम नरस्य रुपमधिकं प्रच्छन्नमन्तर्धनम्

विद्या भोगकरी यशः सुखकरी विद्या गुरूणा गुरुः ।

विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥३॥

भावार्थः विद्या एव मनुष्यस्य अधिकं रूपम गुप्तं धनम भोगैश्वर्य कीर्तिप्रदा विद्या गुरुभिरपि पूज्या. प्रवासे बान्धववत सहायिका सर्वोत्तमा देवरूपा अस्ति । विद्यया राजसभायां नरस्य प्रतिष्ठा भवति न तु धनेन. अतः विद्या विहीनो जनः पशुरिव भवति ।

अन्वयः नरस्य विद्या नाम अधिकं रूपं प्रच्छन्नम्,अन्तर्धनं, विद्या भोगकरी यशः सुखकरी, विद्या गुरुणां गुरुः, विद्या विदेशगमने वन्धुजनः विद्या परं दैवतं विद्या राजसु पूज्यते न हि धनम् (अतः) विद्याविहीनः पशुः ॥

व्याकरणम् अन्तः स्थितं धनम् अन्तर्धनम् (क.त.) मध्यमपदलोपी । भोगं करोतीति भोगकरी । यशश्च सुखञ्च यशः सुखे (द्वन्द्व) ते करोतीति यशः सुखकरी । विद्यया विहीनः विद्याविहीनः । तृ. त) ।

कोपः- " मनुजा मानवा नराः " इत्यमरः । " रिक्थमृक्थं धनं वसु " इत्यमरः।

" यशः कीर्तिः समज्ञा च " इत्यमरः । सगोत्रवान्धवज्ञातिबन्धुस्वस्वजनाः समाः " इत्यमरः ।

" वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् " इत्यमरः ।

शब्दार्थाः

अधिकम्=श्रेष्ठम् रूपम्=स्वरूपम

प्रच्छन्नम् = गुप्तम् अन्तर्धनम् = अन्तःस्थितं धनम्

भोगकरी=भोगप्रदा गुरूणाम्=पूज्यानाम

परम्=उत्तमम

अत्र शार्दूलविक्रीडितवृत्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥४॥

भावार्थः सज्जनसम्पर्को जनानां बुद्धिमान्द्यं विनाशयति वचने सत्यता वर्द्धयति, मानोन्नतिं प्रददाति, पापं निराकरोति, चित्तमाह्लादयति, दिक्षु कीर्तिं विस्तारयति । अर्थात् सत्सङ्गतिः पुरुषाणां सर्वं करोति ।

अन्वयः सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति, (अत एव) कथय सत्सङ्गतिः पुंसां किं न करोति ।

व्याकरणम् ध्यायत्यनया इति धीः । सतां सङ्गतिः सज्जनसङ्गतिः, (प.त.)। जडस्य भावः कर्म वा जाड्यम् । मानस्य उन्नतिम् मानोन्नतिम् (प. त.)। दिश्+लट्+तिप्=दिशति ।

कोशः "बुद्धिर्मनीषा धिषणा धीः " इत्यमरः । " भाषितं वचनं वचः " इत्यमरः । " पापं किल्बिषकल्मषम् " इत्यमरः । "चित्तं तु चेतो हृदयम् " इत्यमरः । " दिशस्तु ककुभः काष्ठा " इत्यमरः ।

शब्दार्थाः

जाड्यं= शठताम्, धियः=बुद्धेः
सिञ्चति=सेचनं करोति , मानोन्नतिं= संमानवृद्धिम्,
दिशति= संपादयति, दिक्षु= आशासु,
तनोति=विस्तारयति, पुंसाम्=मनुष्याणाम्,
कथय=वद ।

अत्र वसन्ततिलकावृत्तम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।

मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥५॥

भावार्थः फणासु रत्नेन सुशोभितोऽपि सर्पः यथा भयावहो भवति, यतो मणिलोभात्तत्र गतं मनुष्यं स दशत्येव, तथा कोऽपि दुर्जनो विद्वानस्तीति न विश्वसनीयः, यतो हि विद्यया तस्य स्वभावपरिवर्तनं न भवति ।

अन्वयः विद्यया अलङ्कृतोऽपि सन् दुर्जनः परिहर्तव्यः मणिना भूषितः असौ सर्पः किं न भयङ्करः ।

व्याकरणम्- भयं करोतीति भयङ्कर ।

कोषः "रत्नं " मणिर्द्वयोः " इत्यमरः । " सर्पः पृदाकुर्भुजगः " इत्यमरः ।

शब्दार्थाः

दुर्जनः = मूर्खः परिहर्तव्यः= परित्याज्यः,

अलङ्कृतः= सुशोभितः, भयङ्करः=त्रासदः ।

अत्र अनुष्टुब्वृत्तम् ।

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।

यशसि चाभिरुचिर्व्यसनं श्रुतौ, प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ६॥

भावार्थः महापुरुषाणां स्वाभाविको गुणो भवति यत्ते आपदि व्याकुला न भवन्ति, सम्पत्तौ सर्वं क्षमन्ते, शास्त्रेषु सततं संलग्ना भवन्ति ।

अन्वयः विपदि धैर्यम् ,अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि च अभिरुचिः , श्रुतौ व्यसनं हि इदं महात्मनां प्रकृतिसिद्धम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याकरणम्:- वाचः पटुता वाक्पटुता (ष. त.) । प्रकृत्या सिद्धम् प्रकृतिसिद्धम्। (तृ.त.)

कोषः "विपत्तौ विपदापदौ " इत्यमरः । " क्षितिक्षान्त्योः क्षमा " इत्यमरः । " समज्या परिषद्गोष्ठी सभासमितिसंसदः " इत्यमरः ।

शब्दार्थाः

विपदि= विपत्तौ	धैर्यम्=धीरता
अभ्युदये=अभिवृद्धौ	क्षमा=सहनशीलता
सदसि=सभायाम्	वाक्पटुता=वाग्मिता
युधि=युद्धे	विक्रमः= पराक्रमः
यशसि=कीर्तौ	अभिरूचिः= अधिकं प्रेमा
श्रुतौ=वेदे	व्यसनम्=आसक्तिः
हि= निश्चयेन	महात्मनाम्=सत्पुरूषाणाम्
प्रकृतिसिद्धम्= स्वाभाविकम्	
युधि= युद्धे	विक्रमः= पराक्रमः

यशसि=कीर्तौ, अत्र द्रुतविलम्बितवृत्तम् ।

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ७ ॥

भावार्थः धीरा जनाः स्तुतेर्निन्दाया वा अपेक्षां न कुर्वन्ति, सम्पत्तिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राप्यते न वेति च नापेक्षन्ते, दीर्घजीवनस्य मृत्योर्वा चिन्तां त्यजन्ति परं न्यायमार्गं न त्यजन्ति ।

अन्वयः नीतिनिपुणाः यदि निन्दन्तु स्तुवन्तु वा लक्ष्मीः समाविशतु यथेष्टं गच्छतु वा अद्यैव मरणमस्तु युगान्तरे वा (परं) धीराः न्याय्यात्पथः पदं न प्रविचलन्ति ।

व्याकरणम् नीतौ निपुणाः नीतिनिपुणाः (स.त.) । सम् + आ + विश् + लोट् = समाविशतु । इष्टम् अनतिक्रम्य यथेष्टम् (अव्ययी.) अन्यस्मिन् युगे युगान्तरे (क.त.) ।

कोशः 'संपत्तिः श्रीश्च लक्ष्मीश्च' इत्यमरः ।

शब्दार्थाः

नीतिनिपुणाः	= नीतिशास्त्रकुशलाः	निन्दन्तु	= अधिक्षिपन्तु
यदि वा	= अथवा	स्तुवन्तु	= स्तुतिं कुर्वन्तु
लक्ष्मीः	= संपत्तिः	समाविशतु	= सम्यगागच्छतु
मरणम्	= मृत्युः	युगान्तरे	= अपरस्मिन् युगे
धीराः	= धैर्यशीला जनाः	न्याय्यात्	= न्याययुक्तात्
पथः	= मार्गात्	पदम्	= चरणमात्रम्

अत्र वसन्ततिलकावृत्तम् ।

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति ॥ ८ ॥

भावार्थः देहाद्बहिस्थाः शत्रवोऽपि कार्यं निघ्नन्ति चेदालस्यं तु देहान्तर्गतः शत्रुः, तस्मात् अलसेन जनेन कथं सिद्धिर्लभ्येत । उद्योगश्च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वदा बन्धुरिव सहयोगं करोति, अत आलस्यं विहाय सततं सोद्योगेन भाव्यम् ।

अन्वयः मनुष्याणां शरीरस्थः महान् रिपुः आलस्यं हि, उद्यमसमः बन्धुः नास्ति, यं कृत्वा नावसीदति ।

व्याकरणम् शरीरे तिष्ठतीति शरीरस्थः (स.त.) । उद्यमेन समः उद्यमसमः (तृ.त.) । अलसस्य भावः आलस्यम् । अव + सद् + लट् + तिप्= अवसीदति ।

कोशः 'शरीरं वर्ष्म विग्रहः' इत्यमरः । "रिपौ वैरिसपत्नारिः"इत्यमरः

शब्दार्थाः

आलस्यम्	=	कर्मणि अप्रवृत्ति :	शरीरस्थः	=	देहस्थः
महान्	=	प्रबलः	रिपुः	=	शत्रुः
उद्योगसमः	=	पुरुषार्थतुल्यः	बन्धुः	=	आत्मीयो जनः
अवसीदति	=	दुःखं न प्राप्नोति । अत्र अनुष्टुब्वृत्तम् ॥			

अभ्यासः

प्रश्नाः

१. क) सूर्यातपः केन निवारयितुं शक्यते

ख) शास्त्रे कस्यौषधं नास्ति ?

ग) भुवि भारभूता जनाः के ?

घ) विद्याविहीनो जनः कीदृशो भवति ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ङ) सत्सङ्गतिर्धियः किं हरति ?

च) धीराः कीदृशात्पथः न प्रविचलन्ति ?

छ) मनुष्याणां शरीरस्थो रिपुः कः?

ज) मनुष्याणां बन्धुः कः ?

२. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति ।
अस्य पद्यस्यान्वयः प्रदर्श्यताम् ।

३. निम्नाङ्कितस्य श्लोकस्य संस्कृते व्याख्यां कुरुत -

दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥

४. महात्मनां स्वाभाविका गुणा वर्ण्यन्ताम् -

५. पशुमानवयोः सामान्यलक्षणानि कानि ? ।

६. विग्रहं प्रदर्शयत

गोगर्दभौ, यशःसुखकरी, सत्सङ्गतिः, वाक्पटुता, यथेष्टम् ।

७. स्वकीयवाक्येषु प्रयोगं कुरुत -

हुतभुक्, मर्त्यलोके, सिञ्चति, सर्पः, स्तुवन्तु ।

८ पर्यायशब्दान् लिखत -

जलेन, मृगाः, विक्रमः, धीराः, बन्धुः ।

९. सन्धिविच्छेदं कुरुत -

सर्वस्यौपधम्, यथेष्टम्, नावसीदति, उन्नतिः, नास्त्यौपधम् ।

१०. परस्परं मेलयत -

क. औपधम् क. पूज्यते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ख. भारभूता:	ख. तनोति
ग. विद्या	ग. परिहर्तव्य:
घ. कीर्तिम्	घ. अस्ति
ङ. उद्यमसम:	ङ. जना:
च. दुर्जन:	च. बन्धुर्नास्ति ।

चतुर्थपाठः

चाणक्यनीतिः

<u>पाठपरिचय:</u>

चाणक्यनीतिदर्पणस्य निर्मातु: कवेर्वास्तविकं नाम विष्णुगुप्त आसीत्। परं कविरयं कुटिलराजनीतिज्ञत्वेन कौटिल्य इति चणकपुत्रत्वेन चाणक्य इति च नाम्ना व्यपदिश्यते । मौर्यसाम्राज्यस्य यशसा सह राजनीतौ निपुणस्य कौटिल्यस्य कीर्तिकथा राजनीतिकेतिहासे एकत: प्रसृता अपरतश्च स्वशेमुषीनैपुण्येन संस्कृतसाहित्यस्येतिहासे विशिष्टं स्थानं प्राप्तम् अनेन कविना । चाणक्येनैव नन्दवंशस्य विनाशो मौर्यवंशस्य च प्रतिष्ठा कृताऽऽसीदिति इतिहासपठनाज्ज्ञायते । राजनीतिविषये 'कौटिलीयमर्थशास्त्रम्' नीतिविषये 'चाणक्यनीतिदर्पण:" चेति द्वौ ग्रन्थौ कौटिल्यस्य सुप्रसिद्धौ स्त: । कौटिल्य: युगप्रवर्तकत्वेन, संस्कृतवाङ्मये अमरोऽस्ति । मौर्यसाम्राज्यस्य प्रथमशासकस्य चन्द्रगुप्तस्य समय एव अस्य समय: । अत: कौटिल्येनेयं पृथ्वी ई.पू. तृतीयशताब्द्यां समलङ्कृताऽऽसीदिति कथयितुं शक्यते । पाठेऽस्मिन् 'चाणक्यनीतिदर्पण'- ग्रन्थात् पञ्चश्लोका: समुद्धृता: सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थपाठः

चाणक्यनीतिः

दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ १ ॥

भावार्थः यथा सर्पयुक्ते गृहे निवसतो जनस्य यस्मिन् कस्मिन्नपि समये मृत्युर्भवितुं शक्नोति तथैव दुराचारयुता भार्या, मूर्खो मित्रम् उत्तरदाता सेवकश्च यस्य गृहे सन्ति तस्यापि जनस्य सुखप्राप्तिर्न भवत्येव । अकाले मरणं भवतीति तात्पर्यम् ।

अन्वयः (यस्य गृहे) दुष्टा भार्या शठं मित्रं भृत्यश्च उत्तरदायकः ससर्पे च गृहे वासः (अस्ति) तस्य मृत्युरेव (भवति) तत्र संशयःन ।

व्याकरणम् सर्पेण सहितं ससर्पं तस्मिन् । (बहुव्रीहिः) उत्तरस्य दायकः उत्तरदायकः (ष.त.)

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र चन्दनं न वने वने ॥ २ ॥

भावार्थः यथा सर्वेषु पर्वतेषु रत्नं न भवति सर्वेषु नागेषु मौक्तिकं न भवति, सर्वेषु वनेषु चन्दनञ्च न भवति तथा सर्वत्र साधवो नैव भवन्ति । अर्थात् सर्वोत्कृष्टं वस्तु विरलमेव भवतीति तात्पर्यम् ॥

अन्वयः शैले शैले (यथा) माणिक्यं न (भवति) गजे गजे यथा मौक्तिकं न (भवति) चन्दनम् (अपि) वने वने न (भवति) हि सर्वत्र साधवः न (भवन्ति) ।

व्याकरणम् शैले शैले, गजे गजे, वने वने इत्यत्र वीप्सायां द्वित्वम् ।

अधमा धनमिच्छन्ति धनं मानं च मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ ३ ॥

भावार्थः निकृष्टपुरुषाः केवलं धनमभिलषन्ति, मध्यमाः पुरुषाः धनं मानञ्च वाञ्छन्ति, परमुत्कृष्टाः पुरुषा मानमेवाभिलषन्ति । अर्थात महापुरुषाणां धनं मान एव भवतीति भावः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः अधमा जनाः धनम् इच्छन्ति, मध्यमाः धनम्-मानञ्च इच्छन्ति उत्तमाः मानम् इच्छन्ति हि मानः महतां धनम् भवति ।

रङ्कं करोति राजानं राजानं रङ्कमेव च ।
धनिनं निर्धनञ्चैव निर्धनं धनिनं विधिः ॥ ४ ॥

भावार्थः अस्मिन् संसारे विधिरेव सर्वं करोति, जना विधिविपरीतं कर्तुं नैव प्रभवन्ति, यतो हि विधिर्दरिद्रमपि राजानं विदधाति, राजानमपि रङ्कं करोति । अर्थात् दैवायत्तं जगदिति भावः ।

अन्वयः विधिः रङ्कं राजानं करोति, राजानञ्च रङ्कमेव (करोति) धनिनं निर्धनं करोति, निर्धनञ्च धनिनं करोति ।

क्षीयन्ते सर्वदानानि यज्ञहोमबलिक्रियाः ।
न क्षीयते पात्रदानमभयं सर्वदेहिनाम् ॥ ५ ॥

भावार्थः **यज्ञहोमादीनि कर्माणि सर्ववस्तूनां दानानि च नाशं प्राप्नुवन्ति परं सर्वेषां शरीरधारिणाम् अभयदानं सत्पात्रे च दानं न विनश्यति।**

अन्वयः **सर्वदानानि, यज्ञहोमबलिक्रियाः (च) क्षीयन्ते (परम्) पात्रदानं सर्वदेहिनाम् अभयं (च) न क्षीयते ।**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याकरणम् यज्ञश्च होमश्च बलिश्च (द्वन्द्वः) यज्ञहोमबलयः तेषां क्रिया यज्ञहोमबलिक्रियाः (ष.त.)। पात्रे दानम् (स.त.) पात्रदानम्। क्षिणोतेः कर्मणि लटि यद्वा अन्तर्भावितण्यन्तात् क्षयतेः कर्मकर्तरि लटि रुपम्।

अभ्यासः

प्रश्नाः

१. अधोलिखितानां प्रश्नानामुत्तराणि विलिख्यन्ताम् -

(क) कीदृशे गृहे वासात् मृत्युर्भवति ?।

(ख) साधवः कुत्र भवन्ति ?।

(ग) उत्तमा जनाः किमिच्छन्ति ?।

(घ) विधिः निर्धनं किं करोति ?।

(ङ) कीदृशं दानं न क्षीयते ?।

२. निम्नलिखितपद्यस्यान्वयः प्रदर्श्यताम् -

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
साधवो न हि सर्वत्र चन्दनं न वने वने॥

३. संस्कृतभाषायां भावार्थो लेखनीयः -

रङ्कं करोति राजानं राजानं रङ्कमेव च।
धनिनं निर्धनञ्चैव निर्धनं धनिनं विधिः॥

४. स्वकीयवाक्येषु प्रयोगं कुरुत -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृत्युः, माणिक्यम्, मानः, धनिनम्, क्षीयन्ते ।

५. विग्रहः प्रदर्श्यताम् -

पात्रदानम्, ससर्पे, सर्वदेहिनाम् ।

६. परस्परं मेलयत -

(क) दुष्टा	(क) निर्धनम्
(ख) मानम्	(ख) न क्षीयते
(ग) धनिनम्	(ग) गृहे
(घ) पात्रदानम्	(घ) भार्या
(ङ) ससर्पे	(ङ) इच्छन्ति

=०=

पञ्चमः पाठः

विदुरनीतिः

पाठपरिचयः

महाभारतस्य प्रणेता महामुनिः कृष्णद्वैपायन इत्युच्यते, यो वेदं विव्यास इति वेदव्यासनाम्ना ख्यातिं गतवान् । महाभारताऽनुसारेणाऽयं द्वापरान्ते अभूत् । महाभारतस्य युद्धं व्याससन्ततिषु कौरवपाण्डवेष्वभूत । आधुनिका महाभारतस्य समयं खिस्ताब्दात् ५०० वर्ष पूर्व निर्धारयन्ति । महाभारतस्य महाभारतं भारतं जयश्चेति नामत्रयं वर्तते । महाभारते अष्टादशपर्वाणि सन्ति । व्यासोऽष्टादशपुराणानां रचनामकरोत् । तस्य पुत्रः नीतिनिपुणो विदुरः स्वपुत्रस्य दुर्योधनस्य वशगं जात्यन्धमपि महामोहान्धं नीतिमार्गाद्विचलन्तम् अग्रजं धृतराष्ट्रं प्रति नीतिमार्गावलम्बनेनैव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोकद्वयसिद्धिर्भवति, तस्मात् त्वं दुर्योधनपक्षं तिरष्कृत्य नीत्यनुसारेण पाण्डुपुत्रेभ्यो देयं दायं (अंशं) प्रयच्छ, अन्यथा अपयशो वंशविनाशश्च भविष्यतीति प्रसङ्गे नीतिं श्रावयति । नीतिनिपुणस्य स्पष्टवक्तुर्विदुरस्य नीतिर्महाभारतसमये विख्याताऽभूत् । भगवता व्यासेन विरचितस्य

महाभारतस्य उद्योगपर्वणो विदुरनीत्युपदेशात् संगृह्याऽत्र पञ्चमे पाठे चतुर्दश पद्यानि स्थापितानि सन्ति ।

विदुरनीतिः

अनाहूतः प्रविशति अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ १ ॥

अन्वयः मूढचेताः, नराधमः, अनाहूतः, प्रविशति, अपृष्टः, बहु भाषते, अविश्वस्ते, विश्वसिति ।

शब्दार्थाः

मूढचेताः = मूर्खहृदयः, विवेकशून्य इति भावः । नराधमः = तुच्छमनुष्यः । अनाहूतः = अनाकारितः सन्नपि । प्रविशति = प्रवेशं करोति , अन्यस्य गृहमिति शेषः । अपृष्टः = अकृतप्रश्नोऽपि । बहु = अधिकम् । भाषते = वक्ति । अविश्वस्ते = विश्वासरहिते जने । विश्वसिति = विश्वासं करोति ।

कोशः "चित्तं तु चेतो हृदय"मित्यमरः । "मनुजा मानवा नराः" इत्यमरः ।

व्याकरणम् मूढं चेतो यस्य सः मूढचेताः (बहुब्रीहि-समासः) । नरेषु अधमः नराधमः (सप्तमी-तत्पुरुष) । न आहूतः - अनाहूतः (नञ्-त.)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः य आमन्त्रणं विना क्वापि गच्छति, केनचित् अपृष्टोऽपि वदति, विश्वासायोग्ये विश्वासं करोति स मूर्खो भवति ।

एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिन्तयेत् ।

एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ॥ २ ॥

अन्वयः एकः, स्वादु, न भुञ्जीत, एकः, अर्थान्, न चिन्तयेत, एकः, अध्वानम्, न गच्छेत, सुप्तेषु, एकः, न जागृयात् ।

शब्दार्थाः

एकः = एकाकी । स्वादु = मिष्टं वस्तु । न भुञ्जीत = न खादेत् । एकः = एकाकी । अर्थान् = विषयान् । न चिन्तयेत् = न विचारयेत् । एकः = एकाकी । अध्वानं = मार्गं । न गच्छेत् = न यायात् । सुप्तेषु = अन्येषु निद्रितेषु । एकः = एकाकी । न जागृयात् = जागरणं न कुर्यात् ।

कोशः "अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः" इत्यमरः ।

भावार्थः मिष्टान्नभोजनं, विषयचिन्तनं, मार्गगमनं, सर्वेषु सुप्तेषु जागरणं, चैकाकी न कुर्यात्, कृतेऽनर्थाः संभवन्तीति भावः ।

षडिमानि विनश्यन्ति मुहूर्तमनवेक्षणात् ।

गावः सेवा कृषिर्भार्या विद्या वृषलसंगतिः ॥ ३ ॥

अन्वयः गावः, सेवा, कृषिः, भार्या, विद्या, वृषलसंगतिः, इमानि, षट्, मुहूर्तम्, अनवेक्षणात्, विनश्यन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्दार्थाः

भार्या = पत्नी । वृषलसङ्गतिः = शूद्रसङ्गतम् । मुहूर्तं = क्षणमपि । अनवेक्षणात् = अनवलोकनात्, अनवधानादिति भावः । विनश्यन्ति = प्रणश्यन्ति ।

कोशः "माहेयी सौरभेयी गौ"रित्यमरः । "पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी । भार्या जाया थ"त्यमरः । "शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः" इत्यमरः ।

व्याकरणम् वृषलानां सङ्गतिः = वृषलसङ्गतिः - (षष्ठी-तत्पुरुष) ।

भावार्थः गोसेवादीनां षण्णां निरन्तरमवलोकनं कार्यमिति भावः ।

अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यञ्च दमः श्रुतञ्च
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥ ४ ॥

अन्वयः प्रज्ञा, कौल्यं, दमः, श्रुतं, पराक्रमः, अबहुभाषिता, यथाशक्ति दानं, कृतज्ञता च, अष्टौ, गुणाः, पुरुषं, दीपयन्ति ।

शब्दार्थाः

प्रज्ञा = मतिः । कौल्यं = कुलीनता । दमः = इन्द्रियनिग्रहः । श्रुतं= शास्त्रज्ञानम् । पराक्रमः = शक्तिः । अवहुभापिता = मितवादिता । यथाशक्ति = सामर्थ्यानुसारम् । दानं = त्यागः । कृतज्ञता च = उपकाराभिज्ञता च । इमे अप्टौ = अप्टसंख्याकाः । गुणाः । पुरुपं = जनम् । दीपर्यान्त = उज्ज्वलर्यान्त ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कोशः "धीः प्रज्ञा शेमुषी मतिः" इत्यमरः । "दान्तिस्तु दमथो दमः" इत्यमरः । "शक्तिः पराक्रमःप्राणः" इत्यमरः । "त्यागो विहापितं दान"मित्यमरः ।

व्याकरणम् बहु भाषते तच्छीलो बहुभाषी, तस्य भावो बहुभाषिता, न बहुभाषिता अबहुभाषिता (नञ्-समासः) । शक्तिमनतिक्रम्य यथाशक्ति (अव्ययीभाव समासः) ।

भावार्थः प्रज्ञादय अष्टौ गुणाः पुरुषस्य व्यक्तित्वं वर्धयन्तीति भावः ।

न स्वे सुखे वै कुरुते प्रहर्षंनान्यस्य दुःखे भवति प्रहृष्टः ।
दत्वा न पश्चात् कुरुतेऽनुतापं स कथ्यते सत्पुरुषार्यशीलः ॥ ५ ॥

अन्वयः स्वे, सुखे, प्रहर्षं, न कुरुते, अन्यस्य, दुःखे, प्रहृष्टः, न भवति, दत्त्वा, पश्चात्, अनुतापं, न कुरुते, सः, सत्पुरुपार्यशीलः, कथ्यते ।

शब्दार्थाः

प्रहर्पम् = प्रमोदम् । न कुरुते = न करोति । अन्यस्य = अपरस्य । दुःखे = पीडायाम् । प्रहृप्टः = मुदितः । दत्वा = दानं कृत्वा । अनुतापम् = पश्चात्तापम् । सत्पुरुपः = सज्जनपुरुपः । आर्यशीलः = उत्तमस्वभावः ।

कोशः "श्चात्तापोऽनुतापश्चे"यमरः । "शीलं स्वभावे सद्वृत्ते" इत्यमरः

व्याकरणम् संश्चासौ पुरुपः सत्पुरुपः (कर्मधारयः) । आर्यं शीलं यस्य सः आर्यशीलः (वहुब्रीहिः), ततः सत्पुरुपश्चासौ आयंशीलश्चेति सत्पुरुपार्यशीलः (क.धा.समासः) ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः 　　य सुखी सन् गर्वं न करोति, अन्यस्य दुःखे प्रसन्नो न भवति, दानानन्तरं पश्चात्तापं न करोति सज्जनः स आर्यशीलो भण्यते ।

शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न वन्धुभिः ॥ ६ ॥

अन्वयः 　　पुरुपे, शीलं, प्रधानं (भवति), तत्, यस्य, इह, प्रणश्यति, तस्य, जीवितेन, (न अर्थः), धनेन (न अर्थः), वन्धुभिः, न अर्थः ।

शब्दार्थाः

पुरुपे = मनुष्ये । शीलं = सुचरितम् । प्रधानं = मुख्यं वरेण्यं वा । जीवितेन= जीवनेन । न अर्थः = न प्रयोजनम् । धनेन = वित्तेन । वन्धुभिः= ज्ञातिभिः ।

कोशः 　　"क्लीवे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः " इत्यमरः । " रिक्थमृक्थं धनं वसु " इत्यमरः "सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः"इत्यमरः ।

व्याकरणम्: 　प्र उपसर्गपूर्वकात् नश् धातोः लट् तिप् श्यन् णत्वम् ।

भावार्थः 　　शीलरहितमनुष्यस्य सत्यपि धनादौ न किञ्चिन्मूल्यमिति भावः ।

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविधश्च यश्च जानति सेवितुम् ॥७॥

अन्यवः 　　त्रयः, पुरुषाः, सुवर्णपुष्पां, पृथिवीं, चिन्वन्ति, शूरः, कृतविद्यः, यः, सेवितुं च, जानाति ।

शब्दार्थाः

सुवर्णपष्पां= हेमपुष्पाम्, पृथिवीं= मेदिनीम् । चिन्वन्ति= विचिन्वन्ति । शूरः= वीरः । कृतविद्यः = पण्डितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कोश: "स्वर्णं सुवर्णं कनक"मित्यमरः । "गोत्रा कुः पृथिवी पृथ्वी"त्यमरः । "शूरो वीरश्च विक्रान्त" इत्यमरः ।

व्यांकरणम्: सुवर्णमेव पुष्पं यस्या सा तां - सुवर्णपुष्पां (बहुव्रीहिः)

भावार्थः शूरपण्डितसेवाभिज्ञा एव पृथिव्याः लाभं प्राप्तुं शक्नुवन्तीतिभावः।

जरा रूपं हरति हि धैर्यमाशा मृत्युः प्राणान् धर्मचर्यामसूया ।
कामो ह्रियं वृत्तमनार्यसेवा क्रोधः श्रियं सर्वमेवाभिमानः ॥८॥

अन्वयः हि, जरा रूपम्, आशा धैर्यम्, मृत्युः प्राणान्, असूया धर्मचर्याम् कामः ह्रियम, अनार्यसेवा वृत्तम्, क्रोधः श्रियम्, अभिमानः सर्वम् एव, हरति ।

शव्दार्थाः

हि=यथा । जरा=वृद्धावस्था । हरति= नाशयति । आशा= दीर्घतृष्णा । धैर्यम्= धीरताम् । मृत्युः= मरणम् । प्राणान् = असून् । असूया= ईर्ष्या । धर्मचर्याम्=धर्माचरणम् । कामः = स्मरः । ह्रियम = लज्जाम् । अनार्यसेवा= असभ्यसेवा । बृत्तम्= चरित्रम् । क्रोधः= कोपः । श्रियम्= ऐश्वर्यम् । अभिमानः= अहंकारः

कोशः " विस्रसा जरा" । "आशा तृष्णाऽपि चायते"त्यमरः । " मृत्युर्मरणं निधनोऽस्त्रिया"मित्यमरः । " पुंसि भूम्न्यसवः प्राणाः " इत्यमरः । "कामः पञ्चशरः" । "मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा " इत्यमरः । "आर्यसभ्यसज्जनसाधवः" इत्यमरः ।

व्याकरणम् धर्मस्य चर्या धर्मचर्या (ष. त.) । न आर्यः अनार्यः (नञ् त.) अनार्यस्य सेवा अनार्यसेवा (ष. त.)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः वृद्धावस्था सौन्दर्यं, ृष्णा धीरतां, कालः प्राणान्, ईर्ष्या धर्माचरणं कामो लज्जां दुष्टसेवा सच्चरित्रं, कोपश्च सम्पदमेव हरति परन्त्वहङ्कारः सर्वमेव हरतीति सर्वथाऽहङ्कारो न कार्य इति भावः ।

सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥९॥

अन्वयः राजन् ! सततं, प्रियवादिनः पुरुषाः सुलभाः, तु अप्रियस्य, पथ्यस्य, वक्ता, श्रोता च, दुर्लभः ।

शव्दार्थाः

राजन् ! = हे नृप ! । सततम्=निरन्तरम् । प्रियवादिनः =मिष्टभाषिणः । सुलभाः=सुप्रापाः । अप्रियस्य=अमनोरमस्य । तु= परन्तु । पथ्यस्य= हितकरस्य । वक्ता= कथयिता । श्रोता च = श्रवणकर्ता च । दुर्लभः = दुष्प्रापः ।

व्याकरणम् प्रियं वदन्तीति प्रियवादिनः- प्रियशव्दोपपदात् वद्धातोर्णिनिप्रत्ययः । पथः मार्गात् अनपेतं पथ्यं, तस्य पथ्यस्य पथिन् शव्दात् यत् प्रत्ययः ।

भावार्थः संसारे खलु अप्रियस्य पथ्यस्य च वक्तृत्वश्रोतृत्वगुणसम्पन्नः पुरुषः दुष्प्रापः इति भावः ।

नविश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति ॥१०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः अविश्वस्ते, न विश्वसेत्, विश्वस्ते, न अतिविश्वसेत् , विश्वासाद् उत्पन्नं, भयं, मूलानि अपि निकृन्तति ।

शव्दार्थाः

अविश्वस्ते= विश्वासायोग्ये । विश्वस्ते= विश्वासपात्रे । विश्वासाद् = विस्रम्भाद् । उत्पन्नम्= जातम् । भयम् = भीतिः । निकृन्तति = छिनत्ति ।

कोशः "भीतिर्भीः साध्वसं भय"मित्यमरः ।

व्याकरणम् कृती छेदने - लट् (तिप्, नुम्)

भावार्थः विश्वासायोग्ये जने कदापि विश्वासो न कार्यः, बिश्वासयोग्येऽपि अति विश्वासो न विधेयः, अन्यथा अनर्थापत्तिरिति भावः ।

धृतिः शमों दमः शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ॥ ११ ॥

अन्वयः धृतिः, शमः, दमः, शौचं कारुण्यम्, अनिष्ठुरा, वाक्, मित्राणाम्, अनभिद्रोहः च एताः सप्त श्रियः , समिधः ।

शव्दार्थाः

धृतिः = धैर्यम् । शमः = मनोनिग्रहः । दमः = इन्द्रियनिग्रहः । शौचम् = पवित्रता । कारुण्यं = करुणा । अनिष्ठुरा=अक्रूरा । वाक् वाणी । मित्राणाम् = सुहृदाम् । अनभिद्रोहः = द्रोहाभावः । श्रियः ऐश्वर्यस्य समिधः = इन्धनानि।

कोशः- "धृतिर्धारणधैर्ययो"रित्यमरः । "कारुण्यं करुणा घृणा"इत्यमरः । "इध्ममेधःसमित्स्त्रिया"मित्यमरः ।

व्याकरणम् शुचेर्भावः कर्म वा शौचम् - इगन्ताच्च लघुपूर्वात् " इति अण । करुणा एव कारुण्यं- स्वार्थे ष्यञ् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः यथा समिधः अग्निं संवर्धयन्ति तथैव धृत्यादयः सप्त गुणा अपि ऐश्वर्यं वर्धयन्तीति भावः ।

मत्या परीक्ष्य मेधावी बुद्ध्या सम्पाद्य चासकृत् ।
श्रुत्वा दृष्ट्वाऽथ विज्ञाय प्राज्ञैर्मैत्रीं समाचरेत् ॥ १२ ॥

अन्वयः मेधावी, मत्या, परीक्ष्य, बुद्ध्या, असकृत्, सम्पाद्य, अथ, श्रुत्वा, दृष्ट्वा च, विज्ञाय, प्राज्ञैः, मैत्रीं, समाचरेत् ।

शव्दार्थाः

मेधावी = बुद्धिमान् । मत्या = मननेन । परीक्ष्य = विचार्य । बुद्ध्या = स्वानुभवेन । असकृत् = अनेकवारम् । सम्पाद्य = कार्ययोग्यतां निश्चित्य। प्राज्ञैः = प्राज्ञपुरूषैः । मैत्रीं = मित्रताम् । समाचरेत् = कुर्यात् ।

कोशः " धीर्धारणवती मेधा " इत्यमरः ।

व्याकरणम् मेधा शव्दात् " अस्मायामेधास्रजो बिनिः " इति विनिप्रत्ययः। मित्रस्य भाव कर्म वा मैत्री (ष्यञ्, ङीष्) ।

भावार्थः बुद्धिमान् पुरुषः मननेन अनुभबेन लोकचर्चामाकर्ण्य योग्यतां निश्चित्य स्वयं च विचार्यैव प्राज्ञैः सह मैत्रीं कुर्यादिति भावः ।

सुवर्णस्य मलं रूप्यं रूप्यस्याऽपि मलं त्रपु ।
ज्ञेयं त्रपुमलं सीसं सीसस्यापि मलं मलम् ॥१३॥

अन्वय : सुवर्णस्य,मलं, रूप्यं,ज्ञेयं, रूप्यस्य, अपि,मलं,त्रपु, त्रपुमलं, सीसं,सीसस्य, अपि,मलं,मलम् एव ।

शब्दार्था :

सुवर्णस्य = हेम्न : । मलं = किट्टं,रूप्यं = रजतम्, ज्ञेयं =बोध्यम ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रपु = पिच्चटम् (राङ् इति भाषायाम्)। त्रपुमलं = रङ्गकिट्टम् । सीसं = योगेष्टम् ।

कोशः "किट्टं मलोऽस्त्रिया"मित्यमरः । "दुर्वर्णं रजतं रूप्य"मित्यमरः । "नागसीसकयोगेष्ट वप्राणि त्रपु पिच्चटम् ।रङ्ग बङ्गे" ....इत्यमर :।

व्याकरणम् त्रपुणो मलं - त्रपुमलं (ष०त०)

भावार्थः उत्कृष्टस्य वस्तुनो मलमप्युपयुज्यते परमनुत्कृष्टस्य मलमकिञ्चित्करमेवेति भावः ।

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।

नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥ १४॥

अन्वयः अग्निः काष्ठानां न, महोदधिः आपगानां न, अन्तकः सर्वभूतानां न, वामलोचना पुंसां न तृप्यति ।

शव्दार्थाः

अग्निः = वन्हिः । काष्ठानाम् = इन्धनानां, न, तृप्यति = न सन्तुष्यति । महोदधिः = सिन्धुः । आपगानाम् = नदीनाम् । अन्तकः = यमः सर्वभूतानाम्= सकलप्राणिनाम् । वामलोचना = स्त्री । पुंसाम् = पुरुषाणाम्।

कोशः अग्निर्बैश्वानरो वह्निरित्यमरः । " उदन्वानुदधिः सिन्धुरित्यमरः ।

व्याकरणम् अत्र काष्ठानामित्यादिषु करणस्य शेषत्वविवक्षायां षष्ठी ज्ञेया।

वामे- सुन्दरे लोचने- नयने यस्याःसा - वामलोचना (बहुव्रीहिः) ।

भावार्थः अग्निसागरयमस्त्रियो स्वस्वविषयातिशयभोगेऽपि तृप्तिं न यान्तीति भावः ।

=०=

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभ्यासः

प्रश्नाः

१. अधस्तनानां प्रश्नानामुत्तराणि लिखत -

क. अपृष्टो भाषमाणो जनः किं भवति ?

ख. मुहूर्तमनवेक्षणात् विनश्यमानानि वस्तूनि कानि ?

ग. अष्टौ गुणाः के ? ते च पुरुषं किं कुर्वन्ति ?

घ. कीदृशो जनः सत्पुरुष आर्यशीलश्च भवति ?

ङ. कीदृशस्य जनस्य बन्धुभिः प्रयोजनं न भवति ?

२. अधः स्थित पद्यस्य साधु व्याख्यां कुरूत-

एकः स्वादु न भुञ्जीत एकश्चार्थान्नचिन्तयेत् ।
एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ॥

३. सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥

अस्य पद्यस्य भावार्थं लिखत ।

४. सुलभाः पुरुषा राजन् सततं प्रियबादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥

अस्य पद्यस्य अन्वयं प्रदर्शयत ।

५. रिक्तस्थानेषु उपयुक्तान् शव्दान् स्थापयत-

क. जरा .... हरति (रूपं, विद्यां)

ख. अभिमानः .... हरति (श्रियं, सर्वम्)

ग. सततं .... सुलभा । (पथ्यवादिनः, प्रियवादिनः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घ. विश्वासादुत्पन्नं .... मूलानि निकृन्तति । (भयं, दुःखम्)

ङ. सुवर्णस्य मलं .... । (सीसम्, रौप्यम्)

च. अन्तक .... न तृप्यति । (सर्वभूतानाम् ,आपगानाम्)

६. सन्धिविच्छेदं कुरुत

महोदधिः, वागनिष्ठुराः, कौल्यञ्च, पुरुषास्त्रयः ।

७. विग्रहं पदर्शयत

मूढचेता, बहुभाषिता, सुवर्णपुष्पां, प्रियवादिनः ।

८. स्वकीयवाक्येषु प्रयोगं कुरुत -

प्रविशति, विद्या, प्रहर्षम्, मित्राणाम् ।

९. पररस्परं मेलयत-

क. अनाहुतः	क. प्राणान् हरति ।
ख. अध्वानं	ख. परीक्ष्य ।
ग. मृत्युः	ग. प्रविशति ।
घ. अप्रियस्य	घ. पथ्यस्य ।
ङ. मत्या	ङ. न गच्छेत् ।

=०=

हितोपदेशः

<u>पाठपरिचयः</u>:

हितोपदेशान्तर्गतानां पद्यानां कथानाञ्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पशुपक्षिणां मनोहरिणीभि कथाभिः नीतेर्व्यवहारस्य चोपदेशः संस्कृतकथासहित्यस्य वैशिष्ट्यं विद्यते । बृहत्कथा- कथामञ्जरी- कथा-सरित्सागर- वेतालपञ्चविंशति-हितोपदेशप्रभृतयो ग्रन्थाः पशुपक्षिकथापरम्परायां प्रसिद्धाः सन्ति । हितोपदेशनामको ग्रन्थः पञ्चतन्त्रात् संगृहीतो विद्यते । पञ्चतन्त्रे पञ्च तन्त्राणि सन्ति । परं हितोपदेशे चत्वार एव भागाः सन्ति ।

मित्रलाभः सुहृद्भेदः विग्रहः सन्धिश्चैषु चतुर्ष्वेव पञ्चतन्त्रस्य पञ्चभागानां सन्निवेशो दृश्यते ।

हितोपदेशनामा ग्रन्थो न मौलिकः प्रत्युत पञ्चतन्त्राद् अन्यतश्च समाहृत्य लिखितः संग्रहरूपो वर्तते इति स्वयंमेवास्य रचयिता स्वीकरोति ।

" पञ्चतन्त्रात्तथाऽन्यस्मात् ग्रन्थादाकृष्य लिख्यते " इति ।

हितोपदेशस्य रचयिता नारायणपण्डितो विद्यते । अयं वङ्गराजस्यधवलचन्द्रस्याश्रये स्थितोऽभूत् । अतोऽस्य समयो विक्रमस्य चतुर्दशशताब्दी निर्धार्यतें । सङ्ग्रहरूपोऽप्ययं ग्रन्थो नीतिग्रन्थेषु महत्वपूर्णस्थानं बिभर्ति ।

पाठ्यपुस्तकेऽस्मिन् हितोपदेशस्य मित्रलाभात् समाहृत्य षष्ठसप्तमाष्टमपाठेषु कानिचित् उपयोगीनि नीतिपद्यानि, प्रस्तुतानि सन्ति । ततश्चात्र प्रस्तुताः सर्वा अपि नीतिकथा हितोपदेशस्य मित्रलाभाद् एव संगृहीताः सन्ति । यद्यपि मूलग्रन्थे सर्वा अपि कथाः परस्परसापेक्षाः श्रृङ्खलाबद्धाश्च संन्ति । परन्त्वत्र पाठ्यक्रमानुरोधात् जटिलतां परिहर्तुं च ताः प्रसङ्गं विना स्वतन्त्ररूपेण प्रस्तूयन्ते । मूलग्रन्थानुसारेण पाटलिपुत्रस्य राज्ञः सुदर्शनस्यानुरोधेन तत्पुत्रान शिक्षयितुं विष्णुशर्मा - " साधनहीना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निर्धनाश्चापि बुद्धिमन्तो मैत्रया स्वकार्याणि साधयन्ति ” इति प्रतिपादयितुं चित्रग्रीवहिरण्यकलघुपतनकमन्थरकनाम्नां मृगमूषकवायसकच्छपानां कथां प्रस्तौति । एपा कथा व्यापिन्यस्ति । अन्याश्च प्रासङ्गिका अवान्तरकथा विद्यन्ते । व्यापिन्यपि कथाऽत्र पाठ्यपुस्तके संगृह्यैकत्रैव नवमे पांठे स्थापिताः।

अन्या अवान्तरकथा अपि प्रसङ्गोल्लेखं विना प्रस्तुताः सन्ति ।तत्सम्बन्धिनी जिज्ञासा तु मूलग्रन्थत एव पूरयितुं शक्यते ।

षष्ठपाठः

हितोपदेशः

अजरामरवत्प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ १॥

भावार्थः पण्डितो जनो जरामरणरहित इव शास्त्रकलादिज्ञानमभ्यसेत् परं मृत्युरद्य श्वो वा भविष्यतीति विचार्य पुण्यं कुर्यात् ।

अन्वयः प्राज्ञः अजरामरवत् विद्याम् अर्थञ्च चिन्तयेत्, मृत्युना केशेषु गृहीत इव धर्मम् आचरेत् ।

व्याकरणम् अजरश्चासौ अमरः अजरामरः तेन तुल्यम् अजरामरवत् वतिप्रत्ययः । आङुपसर्गपूर्वकात् चर धातोः विधिलिङि आचरेत् इति ।

कोशः “कचः केशः शिरोरुहः ” इत्यमरः । “स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ” इत्यमरः।

शव्दार्थाः

प्राज्ञः = पण्डितः,
अजरामरवत् = जरामरणरहित इव,
मृत्युना = यमेन
केशेषु = मूर्धजेषु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्याम् = शास्त्रकलादिज्ञानम् गृहीत इव = आत्त इव ,
अर्थम् = धनम्, धर्मम् = पुण्यम् ,
चिन्तयेत् = विचारयेत्, आचरेत् = अनुतिष्ठेत् ।

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ २ ॥

भावार्थः विद्या जनाेय नम्रतां ददाति, विनयाद् जनः सज्जनतां प्राप्नोति, योग्यो नरो धनमर्जयति, धनात् पुरुषो धर्मं करोति, धर्मात् सुखं भवति । अर्थात् सकलाभीष्टमूलं विद्यैवेति भावः ।

अन्वयः विद्या विनयं ददाति, विनयात् पात्रतां याति, पात्रत्वात, धनम् आप्नोति, धनात् धर्मं ततः सुखम् आप्नोति ।

व्याकरणम् पात्रस्य भावः पात्रता तां पात्रताम् । आप्लृ व्याप्तौ लट् तिप् आप्नोतीति ।

कोशः "रिक्थमृक्थं धनं वसु " इयमरः ।

यौवनं धनसम्पतिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥ ३ ॥

भावार्थः युवावस्था धनप्राचुर्म्, स्वामित्वम्, विचारशून्यता, एषां वस्तूनां मध्ये एकमपि विपत्तये भवति चेत् यस्मिन् जने चत्वार्यपि भवन्ति तस्य तु किमु वक्तव्यम ।

अन्वयः यौवनं धनसम्पतिः प्रभुत्वम् अविवेकिता एकैकमपि अनर्थाय, यत्र चतुष्टयं(तत्र) किमु (वक्तव्यम्) ।

व्याकरणम्:- यूनो भावः अण् प्रत्ययः यौवनम । प्रभोर्भावः प्रभुत्वम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कोशः "तारुण्यं यौवनं समे " इत्यमर । " अधिभूर्नाको नेता प्रभुः परिवृढोऽधिपः" इत्यमरः ।

शब्दार्थाः

यौवनं = तारुण्यम्, एकैकमपि = प्रत्येकमपि,

धनसम्पतिः = धनप्राचुर्यम्, अनर्थाय = विपत्तये,

प्रभुत्वं = प्रभोर्भावः, चतुष्टयं = चतुष्कम् ॥

अविवेकिता = सदसद्विचारशून्यता ।

पुण्यतीर्थे कृतं येन तपः क्वाऽप्यतिदुष्करम् ।

तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकः सुधीः ॥ ४॥

भावार्थः य: पुरुषः पुण्यक्षेत्रे अतिकठिनं धर्मकार्यं करोति, तस्य पुत्रः समृद्धः, धर्मशीलः, पण्डितः, आज्ञाकारी च भवती नात्र सन्देहः ।

अन्वयः येन क्वाऽपि पुण्यतीर्थे अतिदुष्करं तपः कृतम् तस्य पुत्रः वश्यः समृद्धः, धार्मिकः सुधीः भवेत् ।

व्याकरणम् पुण्यं च तत् तीर्थं पुण्यतीर्थं तस्मिन् पुण्यतीर्थे (क. धा.त.)

कोशः "निपानागमयोस्तीर्थमृपिजुष्टजले गुरौ" इति कोशः । "आत्मजस्तनयः सूनुः सुतः पुत्रः " इत्यमरः । " विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः " इत्यमरः ।

शब्दार्थाः

अतिदुष्करम् = अतिकठिनम्, तपः = धर्मानुष्ठानम

समृद्धः = धनादियुक्तः , वश्यः = आज्ञाकारी

भवेत् = स्यात् ।

को धन्यो बहुभिः पुत्रैः कुशूलापूरणाऽऽढकै : ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वरमेकः कुलालम्बी यत्र विश्रूयते पिता ॥ ५ ॥

भावार्थः तुपपूर्णपात्रतुल्यैर्बहुभिः पुत्रैर्नकोऽपि पिता कृतकृत्यो भवति परं वंशप्रकाशक एक एव पुत्रः श्रेष्ठो भवति, यतो वंशप्रकाशकेन एकेनैव पुत्रेण पिता सुप्रसिद्धो भवति ।

अन्वयः कुशूलापूरणाढकैः बहुभिः पुत्रै को धन्यः कुलालम्बी एकः वरं यत्र पिता विश्रूयते ।

व्याकरणम् कुशूलैः आपूरणाः कुशूलापूरणाः (तृ. त.) कुशूलापूरणाश्च ते आढकाश्च तैः कुशूलापूरणाढकैः (क. धा. त.) । कुलमालम्बते तच्छीलः कुलालम्बी णिनिः ।

कोशः "अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः " इत्यमरः । " संततिर्गोत्रजननकुलान्यभिजनान्वयौ " इति कोशः ।

शव्दार्थाः

कुशूलापूरणाढकैः = धान्यबुसपूर्णाढकपात्रैः , कुलालम्बी = वंशप्रकाशकः, विश्रूयते = सुप्रसिद्धो भवति, वरम् = श्रेष्ठम् ।

आयुः कर्म च वित्तं च विद्या निधनमेव च ।
पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥ ६ ॥

भावार्थः विधिना जनस्य आयुः कर्म धनं विद्या निधनं चेमानि पञ्चतत्त्वानि मातृगर्भे एव सृज्यन्ते।

अन्वयः आयुः कर्म च वित्तञ्च विद्या च निधनमेव एतान्यपि पञ्च गर्भस्थस्यैव देहिनः सृज्यन्ते ।

व्याकरणम् गर्भे तिष्ठतीति गर्भस्थः तस्य गर्भस्थस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कोशः "गर्भो भ्रूण इमौ समौ " इत्यमरः । " मरणं निधनोऽस्त्रियाम् " इत्यमरः ।

शव्दार्थाः

आयुः= जीवनकालः निधनम्= मृत्युः,

गर्भस्थस्य = जननीभ्रूणस्थस्य, देहिनः = प्राणिनः ।

काकतालीयवत् प्राप्तं दृष्ढवाऽपि निधिमग्रतः ।
न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥ ७ ॥

भावार्थः अकस्मात् अग्रे समापतितं रत्नादिपूर्णं भाण्डं, भाग्यं पुरुषार्थं विना स्वयं न प्राप्नोति अपि तु तत्रापि पुरुषार्थस्यापेक्षा भवति । मानवैः पुरुषार्थोऽवश्यं कार्य इति भावः ।

अन्वयः काकतालीयवत् प्राप्तं निधिम् अग्रतः दृष्टवाऽपि दैवं स्वयं न आदत्ते (तत्रापि) पुरुषार्थम् अपेक्षते ।

व्याकरणम् काकागमनमिव तालपतनमिव काकतालम् काकतालमिव काकतालीयं काकतालीयेनतुल्यं काकतालीयवत् (क. धा. त.)

कोशः "दैवं दिप्टं भागधेयम् " इति कोशः ।

शव्दार्थाः

काकतालीयवत् = काकतालीयन्यायेन , निधिम् = रत्नम्

पुरुपार्थम्= पुरुपत्वम् , अपेक्षते = अनुधावति ।

मूर्खोऽपि शोभतें तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्नभाषते ॥ ८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः पण्डितसभायां सुवस्त्रावृतो मूर्खो जनस्तावत्पर्यन्तं शोभते यावत्पर्यन्तं स न वदति ।

अन्वयः सभायां वस्त्रवेष्टितः मूर्खोऽपि तावत् शोभते, मूर्खः यावत् किञ्चित् न वदति।

व्याकरणम् वस्त्रेण वेष्टितः वस्त्रवेष्टितः (तृ. त.) । भाप व्यक्तायां वाचि लटि तङि रूपम् भापते ।

कोशः "समज्या परिपद्गोष्ठी सभासमितिसंसदः " इत्यमरः । " वस्त्रमाच्छादनं वासः " इत्यमरः।

शब्दार्थाः

सभायाम् = सदसि , मूर्खः = मूढः

शोभते = विराजते, न भाषते = न वदति ।

अभ्यासः

प्रश्नाः

१. अधस्तनप्रश्नानामुत्तराणि विलिख्यन्ताम्-

क. प्राज्ञः किं किं चिन्तयेत् ?

ख. सुखं कथं भवति ?

घ. गर्भस्थस्य देहिनः कतितत्त्वानि विधिना सृज्यन्ते ?

ङ. सभायां स्थितो मूर्खः कस्मात्पूर्वं शोभते ? ।

२. संस्कृते व्याख्यां कुरुत

पुण्यतीर्थे कृतं येनं तपः क्वाऽप्यतिदुष्करम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकः सुधीः ॥

३. निम्नलिखितपद्यस्य भावार्थः प्रकाश्यताम् -

काकतालीयवत् प्राप्तं दृष्ट्वाऽपि निधिमग्रतः ।

न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥

४. विग्रहं प्रदर्शयत

अजरामरवत्, प्रभुत्वम् ,गर्भस्थस्य, कुशूलापूरणाऽऽढकैः. ।

५. स्वकीयवाक्येषु प्रयोगं कुरुत

आचरेत् , विनयम्, तपः, अग्रतः, शोभते ।

६. पर्यायशब्दान् लिखत

अर्थम् यौवनम्, वश्यः, पुत्रैः, निधनम् ।

७. सन्धिविच्छेदं कुरुत

अप्यनर्थाय, पञ्चैतानि, दृष्ट्वाऽपि, अपेक्षते ।

८. परस्परं मेलयत

क. केशेषु	क. शोभते
ख. विनयम्	ख. प्राप्तः
ग. अतिदुष्करम्	ग. गृहीत इव
घ. निधिम्	घ. ददाति
ङ. सभायाम्	ङ. तपः

=०=

सप्तमपाठः

सुभाषितानि

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥ १ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः विदुषां कालः काव्यशास्त्रमननेन याति, मूर्खाणां कालस्तु सुरापानद्यूतक्रीडादिना, स्वापेन, विवादेन च व्यतीतो भवति ।
अन्वय : धीमतां कालः काव्यशास्त्रविनोदेन गच्छति, मूर्खाणां च व्यसनेन निद्रया कलहेन वा । गच्छति ।।
व्याकरणम्: धीरस्ति येषां ते धीमन्तः (मतुप् प्रत्ययः) तेषां धीमताम् । काव्यञ्च शास्त्रञ्च काव्यशास्त्रे ताभ्यां विनोदस्तेन काव्यशास्त्रविनोदेन।
कोशः " धीमान्सूरिः कृतिः " इत्यमरः । " स्यान्निद्रा शयनं स्वापः " इत्यमरः ।
शव्दार्थाः-

धीमतां = वुद्धिमताम्, कालः = समयः
काव्यशास्त्रविनोदेन = रसात्मकवाक्यस्मृत्यादिशास्त्रमननेन,
व्यसनेन = मद्यपानद्यूतक्रीडादिना,
निद्रया = शयनेन, कलहेन = परस्परविवादेन

इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥ २ ॥

भावार्थः धर्मस्य पन्था अष्टप्रकारः प्रतिपादितः, यथा यज्ञम्, अध्ययनम्, दानम् , व्रताद्यनुष्ठानम्, सत्यम्, धैर्यम्, सहनशीलता, लोभराहित्यञ्च ।
अन्वयः इज्याध्ययनदानानि, तपः सत्यं धृतिः क्षमा अलोभ इति अयं धर्मस्य अष्टविधः मार्गः स्मृतः ।
व्याकरणम्: इज्या च अध्ययनञ्च दानञ्चेति इज्याध्ययनदानानि । (द्वन्द्वः) । अष्टौ विधा यस्य सः अष्टविधः (वहु.) " मार्ग अन्वेषणे " । हलश्चेति घञ् मार्गः ।

कोशः " धृतिर्धारणधैर्ययोः " इत्यमरः । " क्षितिक्षान्त्योः क्षमायुक्ते " इत्यमरः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शव्दार्थाः-

इज्याऽध्ययनदानानि = यज्ञपठनदानानि ,
धृतिः = धैर्यम् मार्गः = पन्थाः
स्मृतः = प्रतिपादितः ।

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरूजस्य किमौषधैः ॥३ ॥

भावार्थः हे युधिष्ठिर ! धनशून्यान् जनान् पालय, धनिने धनं न देहि, रोगार्तस्य भेषजं हितं भवति, रोगरहितस्य तु औषधैर्न प्रयोजनम् ॥

अन्वय : हे कौन्तेय ! दरिद्रान् भर, ईश्वरे, धनं मा प्रयच्छ, व्याधितस्य औषधं पथ्यं । भवति। नीरुजस्य औषधैः किम् ।

व्याकरणम् ओषधेः विकारः औषधम् । निर्गता रुग् यस्मात् तस्य नीरुजस्य ।

कोशः " भेषजौषधभैषज्यान्यगदः " इत्यमरः । " स्त्री रुग्रुजा चोपतापः "इत्यमरः।

शव्दार्थाः-

दरिद्रान् = धनरहितान् भर = पालय,
ईश्वरे = धनवति, मा प्रयच्छ = न देहि ,
व्याधितस्य = रोगार्तस्य,
पथ्यं = हितकरम्
नीरुजस्य = रोगरहितस्य ।

नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा ।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ ४ ॥

भावार्थः नदीनां, शस्त्रधारिणां, नखायुधानां, व्याघ्रादीनां शृङ्गिणां गोमहिषादीनां, स्त्रीषु, राजपरिवारेषु च विश्वासो नैव कर्तव्यः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः नदीनां, शस्त्रपाणीनां नखिनां, शृङ्गिणां तथा स्त्रीषु राजकुलेषु च विश्वासः नैव कर्तव्यः।

व्याकरणम्: शस्त्रं पाणौ येषां ते तेषाम् शस्त्रपाणीनाम् श्रृङ्गं विद्यते येषां ते तेषाम् श्रृङ्गिणाम् (बहु.) ।

कोशः "आयुधं तु प्रहरणं शस्त्रमस्त्रम् " इत्यमरः । " नदी सरित् " इत्यमरः।

शव्दार्थाः

नदीनाम् = आपगानाम्, शस्त्रपाणीनाम् = शस्त्रवताम्,

नखिनाम् = नखायुधानां व्याघ्रादीनाम्, श्रृङ्गिणाम् = विषाणयुक्तानां गोमहिषादीनाम् ,

स हि गगनविहारी कल्मषध्वंसकारी ।
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगाद् ग्रस्यते राहुणाऽसौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥ ५ ॥

भावार्थः आकाशगामी, अन्धकारविनाशकारी सहस्रकिरणयुक्तः सूर्यः तथा नक्षत्रमध्यस्थितश्चन्द्रोऽपि अदृष्टवशात् राहुणा आच्छाद्यते चेत् तदा ललाटे ब्रह्मणा लिखितमन्यथाकर्तुं कः समर्थो भवति अर्थात् न कोऽपीत्यर्थः ।

अन्वयः ललाटे लिखितमपि प्रोज्झितुं कः समर्थः हि विधियोगात गगनविहारी असौ विधुः अपि राहुणा ग्रस्यते ।

व्याकरणम् गगने विहर्तुं शीलमस्य इति गगनविहारी । कल्मषस्य ध्वंसं करोतीति कल्यमपध्वंसकारी । दशशतकरान् धारयतीति दशशतकरधारी । मध्यं चरति तच्छीलः मध्यचारी ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कोशः "नभोऽन्तरिक्षं गगनमनन्तम्" इत्यमरः । "पापं किल्विषकल्मषम् " इत्यमरः । "विधुः सुधाशुः शुभ्रांशु": इत्यमरः । ललाटमलिकं गोधिः इत्यमरः । "भाग्यं स्त्री नियतिर्विधिः "इत्यमरः ।

शव्दार्थाः

गगनविहारी = आकाशचारी दशशतकरधारी = सहस्रकिरणयुक्तः।

कल्मषध्वंसकारी = अन्धकारविनाशशीलः, ज्योतिषाम् = नक्षत्राणाम्

विधुः = चन्द्रः, विधियोगात् = भाग्यवशात्,

राहुणा = ग्रहविशेषेण, ग्रस्यते = आच्छाद्यते ,

ललाटे = भाले, प्रोज्झितुम् = अपाकर्तुम् ।

अत्र मालिनी वृत्तम् ॥

असंभवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।

प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥६॥

भावार्थः यद्यपि सुवर्णमृगस्य जन्म न संभवति, तथापि सर्वज्ञोऽपि श्रीरामचन्द्रः सुवर्णमृगाय लुब्धोऽभवत्, अतः कथ्यते विपदि धीरपुरुषणामपि बुद्धयः कुण्ठिता भवन्ति ।

अन्वयः (यद्यपि) हेममृगस्य जन्म असंभवं तथापि रामः मृगाय लुलुभे (हि) समापन्नविपत्तिकाले, प्रायः पुंसामपि धियः मलिना भवन्ति ।

व्याकरणम् हेम्नः मृगः हेममृगः तस्य हेममृगस्य (ष. त.) । ध्यायत्यनया इति धीः । समापन्नाश्च ता विपत्तयः , तासां कालः, तस्मिन् समापन्नविपत्तिकाले (स. त.)

कोशः "हिरण्यं हेम हाटकम " इत्यमरः । " मृगे कुरङ्गवातायुः इत्यमरः , ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

" कालो दिष्टोऽप्यनेहापि समयः " इत्यमरः । "वुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः " इत्यमरः ।

शब्दार्थाः

हेममृगस्य = कनकहरिणस्य, जन्म = उत्पत्तिः

असंभवं = संभावनारहितम् लुलुभे = लोभं प्राप,

समापन्नविपत्तिकाले = प्राप्तविपत्समये , धियः = बुद्धयः

मलिनाः = कुण्ठिताः । अत्र उपजातिवृत्तम् ।

आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥ ७ ॥

भावार्थः विपद्विनाशाय मनुष्यः प्रथमं धनं सञ्चयेत् परं धनं व्ययीकृत्याऽपि स्त्रियं पालयेत्, आत्मानं तु सर्वस्वव्ययेनापि निरन्तरं रक्षेत् । यतः स्वस्याभावे न धनं नाऽपि स्त्री ॥

अन्वयः (मनुष्यः) आपदर्थे धनं रक्षेत् , धनैरपि दारान् रक्षेत् , दारैरपि धनैरपि आत्मानं सततं रक्षेत् ।

कोशः " रिक्थमृक्थं धनं वसु " इत्यमरः । "भार्या जायाथ पुंभूम्नि दाराः " इत्यमरः ।

शव्दार्थाः

आपदर्थे = विपद्विनाशाय, रक्षेत् = अर्जयेत

धनैरपि = वित्तैरपि, दारान् = स्त्रियम्,

आत्मानम्= निजम्, सततम् = निरन्तरम्।

शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपि वन्धनम् ।
मतिमताञ्च विलोक्य दरिद्रतां विधिरहो वलवानिति मे मतिः ॥८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः चन्द्रसूर्ययोः राहुपीडनं, करिसर्पयोर्नियन्त्रणम्, बुद्धिमतां निर्धनत्वञ्च दृष्ट्वा अहं निश्चिनोमि यत् विधिर्वलवानस्तीति ।

अन्वयः शशिदिवाकरयोः ग्रहपीडनं, गजभुजङ्गमयोः अपि बन्धनम्, मतिमतां दरिद्रताञ्च विलोक्य अहो ! विधिः वलवान् इति मे मतिः (भवति)

व्याकरणम् शशी च दिवाकरश्च शशिदिवाकरौ (द्वन्द्वः) तयोः शशिदिवाकरयोः (ष. त.) । ग्रहेण पीडनम् ग्रहपीडनम् । गजश्च भुजङ्गमश्च गजभुजङ्गमौ (द्वन्द्वः) तयोः गजभुजङ्गमयोः ।

कोशः "सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः " इत्यमरः । " सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिः " इत्यमरः । " धीः प्रज्ञा शेमुषी मतिः " इत्यमरः ।

शव्दार्थाः

शशिदिवाकरयोः = चन्द्रसूर्ययोः, बन्धनम् = नियन्त्रणम्,

मतिमताम् = बुद्धिमताम् , विधि := दैवम् ।

अत्र द्रुतविलम्बितवृत्तम् ।

[redacted]

प्रश्नाः

१. निम्नस्थितप्रश्नानामुत्तराणि विलिख्यन्ताम् -

क. धीमतां कालः कथं गच्छति ?

ख. औषधं पथ्यं कस्य भवति ?

ग. केषां विश्वासो न कर्तव्य ?

घ. विधुः केन ग्रस्यते ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ङ. पुंसां धियः कदा मलिना भवन्ति ?

च. धनं कस्य कृते रक्षेत् ?

२. अधःस्थितश्लोकस्य व्याख्या विधेया-

नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा ।
विश्वासो नैव कर्तव्यः ? स्त्रीषु राजकुलेषु च ॥

३. धर्मस्य मार्गः कतिविधः ? नामग्राहं लिखत

४. " प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति " अस्याशयं प्रकाशयत ।

५. विग्रहं प्रदर्शयत

इज्याध्ययनदानानि, शस्त्रपाणीनां, दशशतकरधारी ।

६. निजवाक्येषु प्रयोगं कुरुत

गच्छति, नदीनाम्, भरः , मलिनाः, ग्रहपीडनम् ।

७. पर्यायशब्दाः प्रदर्शनीयाः

धृतिः, पथ्यम्, स्त्रीषु, ग्रस्यते, लुलुभे ।

८. सन्धि विच्छेदं कुरुत

मार्गोऽयम्, विधुरपि, आपदर्थे, तथापि ।

९.परस्परं मेलयत

क. कलहेन	क.न कर्तव्यः
ख. औपधम्	ख.बलवान्
ग. विश्वासः	ग.रक्षेत्
घ. विधिः	घ.गच्छति
ङ. आत्मानम्	ङ.पथ्यम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टमः पाठः

सूक्तयः

निर्गुणेष्वपि सत्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ॥ १ ॥

भावार्थः यथा चन्द्रश्चाण्डालगृहात् स्वकीयां चन्द्रिकां न संहरति तथा सज्जनाः निर्गणेषु प्राणिषु अपि दयां कुर्वन्ति । अर्थात् साधवो गुणस्यापेक्षां न कुर्वन्ति ।

अन्वयः साधवः निर्गुणेषु सत्त्वेषु अपि दयां कुर्वन्ति, हि चन्द्रः चाण्डालवेश्मनः ज्योत्स्नां न संहरते ।

व्याकरणम् चाण्डालस्य वेश्म चाण्डालवेश्म तस्य चाण्डालवेश्मनः (ष.त.)। दयते रक्षत्यनयेति दया । ज्योतिरस्त्यस्याम् इति ज्योत्स्ना ।

कोशः 'वेश्म सद्म निकेतनम्' इत्यमरः । 'कृपा दयानुकम्पा स्यात्' इत्यमरः। 'चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः ।

शब्दार्थाः

साधवः = सज्जनाः, निर्गुणेषु = गुणरहितेषु,
सत्त्वेषु = प्राणिषु , दयां = कृपाम ,
चाण्डालवेश्मनः =चाण्डालगृहात, ज्योत्स्नां = चन्द्रिकाम ,
न संहरते = न संकोचयति ।

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ २ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावार्थः स्वभावात् कोऽपि जनः कस्यापि मित्रं शत्रुर्वा न भवति परं व्यवहारेणैव मित्राणि शत्रवो वा भवन्ति ।

अन्वयः (यथा) कश्चित् कस्यचित् मित्रं न, कश्चित् कस्यचित् रिपुः न, तथा व्यवहारेण मित्राणि रिपवः (च) जायन्ते ।

व्याकरणम् "जनी प्रादुर्भावे" धातोः कर्तरि लटि झे रूपम् जायन्ते इति ।

कोशः 'अथ मित्रं सखा सुहृत्' इत्यमरः । 'रिपौ वैरिसपत्नारिः' इत्यमरः ।

शब्दार्थाः

मित्रम् = सुहृत्, रिपुः = शत्रुः,

व्यवहारेण = आचरणेन, जायन्ते = भवन्ति ।

संलापितानां मधुरैर्वचोभिर्मिथ्योपचारैश्च वशीकृतानाम् ।
आशावतां श्रद्दधतां च लोके किमर्थिनां वञ्चयितव्यमस्ति ॥ ३ ॥

भावार्थः मधुरैर्वचनैः कपटव्यवहारैः वशे जाताः श्रद्धालव आशायुक्ताः सरला जनाः पूर्वमेव वञ्चितास्तेषां वञ्चनीयं किमवशिष्टं वर्तते ।

अन्वयः लोके, मधुरैः वचोभिः संलापितानां मिथ्योपचारैः वशीकृतानां च आशावतां श्रददधताम् अर्थिनां वञ्चयितव्यं किमस्ति ।

व्याकरणम् सम्यक् लापितानां संलापितानाम् । अवशाः वशाः कृता इति वशीकृताः तेषाम् वशीकृतानाम् ।

कोशः 'भाषितं वचनं वचः' इत्यमरः । 'व्याहार उक्तिर्लपितम्' इत्यमरः । 'आशा तृष्णापि चायता' इत्यमरः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्दार्थाः

मधुरैः = प्रियैः, वचोभिः = वचनैः,
संलापितानाम् = कृतभाषणानाम् मिथ्योपचारैः = कपटव्यवहारैः,
वशीकृतानाम् = स्वायत्तीकृतानाम् , आशावताम् = तृष्णावताम्,
अर्थिनाम् = याचकानाम्, वञ्चयितव्यम् = प्रतारणीयम् ।

यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
नोदके शकटं याति न च नौर्गच्छति स्थले ॥ ४ ॥

भावार्थः यत्कार्यं सर्वथा संपादनायोग्यं भवति तदसाध्यमेव भवति, यतो हि जले शकटं न गच्छति स्थले च तरिर्नगच्छति ।

अन्वयः यदशक्यं तत् न शक्यं, यत् शक्यं तत् शक्यमेव, उदके शकटं न याति, स्थले च नौः न गच्छति ।

व्याकरणम् नुद्यते इति नौः ।

कोषः 'क्लीबेनः शकटोऽस्त्री स्यात्' इत्यमरः । 'कबन्धमुदकं पाथः' इत्यमरः। 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः ।

शब्दार्थाः

अशक्यं = कर्तुमशक्यम् , शक्यं = साध्यम् ,
शकटं = गन्त्री, स्थले = भूमौ,
नौः = तरिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ॥
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥ ५ ॥

भावार्थः परोपदेशे सर्वेपां मनुष्याणाम् वैदुष्यं सुलभं भवत्येव परं धर्ममनुसृत्य स्वकीयाचरणं तु विरलस्यैव महापुरुपस्य भवति ।

अन्वयः सर्वेपां नृणां पाण्डित्यं परोपदेशे सुकरं तु धर्मे स्वीयम् अनुप्ठानम् कस्यचित् महात्मनः (एव) ।

व्याकरणम् परस्मै उपदेशः परोपदेशः तस्मिन् परोपदेशे (स.त.) । पण्डा जाताऽस्य इति इतच् प्रत्ययः, पण्डितः तस्य भावः पाण्डित्यम् ।

कोशः 'मनुजा मानवा नराः' इत्यमरः । 'धीरो मनीपी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः' इत्यमरः ।

शब्दार्थाः

सर्वेपाम् = समेपाम्, नृणाम् = नराणाम्,
परोपदेशे = अन्यजनशिक्षणे, पाण्डित्यम् = विद्वत्ता,
सुकरम्= सरलम्, धर्मे = पुण्यकार्ये,
अनुप्ठानम् = आचरणम्, महात्मनः = महापुरुपस्य,
भवति = जायते ।

तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम् ॥ ६ ॥

भावार्थः येन जनेन आशां विहाय निरभिलापेण भूयते तेन जनेन सर्वशांस्त्राध्ययनं कृतम्, श्रवणीयं सर्वं श्रुतम्, करणीयं सर्वं कृतमिति भावः ।

अन्वयः येन आशाः पृष्ठतः कृत्वा नैराश्यम् अवलम्बितं तेन सर्वम् अधीतं, सर्वं श्रुतं, सर्वम् अनुप्ठितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याकरणम् निर्गता आशा: यस्मात् स निराश: तस्य भाव: नैराश्यम् ।
अनु + ष्ठा + क्त: अनुष्ठित: ।

कोश: 'आशा तृष्णापि चायता' इत्यमर: ।

शब्दार्था:

आशा: = मनोरथा:, पृष्ठत: = पश्चात्,
नैराश्यं = तृष्णात्याग:, अधीतम् - अध्ययनं कृतम् ।

वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता ।
गर्भादुत्पतिते जन्तौ मातु: प्रस्रवत: स्तनौ ॥ ॥

भावार्थ: नरो जीविकार्थं नातियतेत, यतो हि विधाता स्वयमेव जीविकां ददाति यथा जाते शिशौ जनन्या: स्तनौ दुग्धं क्षरत: ।

अन्वय: वृत्त्यर्थम् न अतिचेष्टेत सा (वृत्ति:) धात्रा एव निर्मिता । हि गर्भात् जन्तौ उत्पतिते (सति) मातु:स्तनौ प्रस्रवत: ।

व्याकरणम् प्र + स्रु + लट् + तस् = प्रस्रवत: । अति + चेष्ट + विधिलिङि तङि = अतिचेष्टेत ।

कोश: 'धाताब्जयोनिर्द्रुहिण' इत्यमर: । 'जन्तुजन्युशरीरिण:' इत्यमर: । 'जनयित्री प्रसूर्माता जननी' इत्यमर: । 'स्तनौ कुचौ' इत्यमर: ।

शब्दार्था:

वृत्त्यर्थं =जीविकार्थम् , न अति चेष्टेत = नातियतेत,
जन्तौ = प्राणिनि, गर्भात् = उल्बात्,
उत्पतिते= बहिरागते, मातु: = जनन्या:,
स्तनौ = कुचौ, प्रस्रवत: = क्षरत: ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[redacted]

प्रश्नाः

१. अधोलिखितानां प्रश्नानामुत्तराणि लिखत

क. निर्गुणेष्वपि सत्त्वेषु के दयां कुर्वन्ति ?

ख. मित्राणि कथं जायन्ते ?

ग. शकटं कुत्र न गच्छति ?

घ. सर्वं केनाधीतम् ?

२. निम्नाङ्कितस्य श्लोकस्य तात्पर्यं प्रकाश्यताम्

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।

धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥

३. अधःस्थितस्य श्लोकस्य साधु व्याख्या कार्या

वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता ।
गर्भादुत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ ॥

४. पर्यायशब्दान् लिखत

ज्योत्स्नाम्, अर्थिनाम्, नौः, आशाः, गर्भात् ।

५. विग्रहं प्रदर्शयत

चाण्डालवेश्मनः, निर्गुणम्, परोपदेशे, महात्मनः ।

६. स्वकीयवाक्येषु प्रयोगं कुरुत

दयां, रिपुः, लोके, अशक्यम् ।

७. परस्परं मेलयत

क. निर्गुणेषु	क. पाण्डित्यम्
ख. स्थले	ख. अवलम्बितम
ग. नृणाम्	ग. निर्मिता
घ. नैराश्यम्	घ. सत्त्वेपु
ङ. धात्रा	ङ. याति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नवमपाठः

चित्रग्रीवहिरण्यककथा

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचित् अवसन्नायां रात्रौ अस्ताचलचूडाऽवलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपनतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमटन्तं पाशहस्तं व्याधम् अपश्यत् । तम् आलोक्याचिन्तयत् " अद्य प्रातरेव अनिष्टदर्शनं जातम्, नजाने किम् अनभिमतं दर्शयिष्यति " इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः ।

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम् ,। स च तत्र प्रच्छन्नो भूत्वा स्थितः । अस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पन् तान् तण्डुलकणान् अवलोकयामास । ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्राह - 'कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः ? तन्निरूप्यतां तावत्, भद्रमिदं न पश्यामि, प्रायेणाऽनेन तण्डुलकणलोभेनाऽस्माभिरपि तथा भवितव्यम्' । अतएव सर्वथाऽविचारितं न कर्तव्यम् इति ।

एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह - किमेवमुच्यते ? एतच्छ्रुत्वा तण्डुलकणलोभेन नभोमण्डलादवतीर्य सर्वे कपोतास्तत्रोपविष्टाः । अनन्तरं ते सर्वे जालनिबद्धा वभूवुः, ततो यस्य वचनात् तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति स्म । तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच - नाऽयमस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दोष:;विपत्काले विस्मय एव कापुरुपलक्षणम्, तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् ।

इदानीमपि एवं क्रियताम् - सर्वैरेकचित्तीभूय जालमादाय उड्डीयताम् । इति विचिन्त्य पक्षिण: सर्वे जालमादाय उत्पतिता:, अनन्तरं स व्याध: सुदूराज्जालापहारकाँस्तान् अवलोक्य पश्चाद् धावितोऽचिन्तयत् ।

ततस्तेपु चक्षुर्विषयमतिक्रान्तेषु पक्षिपु स व्याधो निवृत्त: । अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचु: - 'स्वामिन् ! किमिदानी कर्तुम् उचितम् ?

चित्रग्रीव उवाच - 'तन्मे मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे चित्रवने निवसति, सोऽस्माकं पाशांश्छेत्स्यति' इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गता:, हिरण्यकश्च सर्वदा अपायशङ्कया शतद्वारं विवरं कृत्वा निवसति । ततो हिरण्यक: कपोताऽवपातभयाच्चकित: तूष्णीं स्थित: । चित्रग्रीव उवाच - 'सखे ! हिरण्यक !! कथमस्मान्न सम्भाषसे ? ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससम्भ्रमं बहिर्नि:सृत्य अब्रवीत् - आ: ! पुण्यवानस्मि, प्रियसुहृन्मे चित्रग्रीव: समायात: । अथ पाशबद्धांश्चैतान् दृष्ट्वा सविस्मय: क्षणं स्थित्वा उवाच - सखे ! किमेतत् ? चित्रग्रीव उवाच - 'सखे ! अस्माकं प्राक्तनजन्मकर्मण: फलमेतत्' । एतच्छ्रुत्वा हिरण्यक: (स मूषिक:) चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति । तत्र चित्रग्रीव उवाच - 'मित्र ! मा मैवं कुरु, (किन्तु) प्रथममस्मदाश्रितानामेतेपां तावत् पाशांश्छिन्धि, मम पाशं पश्चाच्छेत्स्यसि ।'

हिरण्यकोऽप्याह - 'अहमल्पशक्ति:, दन्ताश्च मे कोमला:, तदेतेषां पाशांश्छेत्तुं कथं समर्थो भवामि ? तत् यावन्मे दन्ता न त्रुट्यन्ति तावत् तव पाशं छिनद्मि । तदनन्तरमप्येतेपां वन्धनं यावच्छक्यं छेत्स्यामि ।' चित्रग्रीव उवाच

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

- अस्त्वेवं तथाऽपि यथाशक्ति बन्धनमेतेषां खण्डय' । हिरण्यकेन उक्तम् - 'आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिवेदिनां सम्मतम्' । चित्रग्रीव उवाच - सखे ! नीतिस्तावत् ईदृश्येव, किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः, तेनेदं ब्रवीमि । अपरश्चाऽसाधारणो हेतुः ।

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन् अब्रवीत् - 'साधु मित्र! साधु अनेनाऽऽश्रितवात्सल्येन त्रैलोक्यस्याऽपि प्रभुत्वं त्वयि युज्यते' । एवमुक्त्वा तेन सर्वेषां कपोतानां बन्धनानि छिन्नानि । ततो हिरण्यकः सर्वान् सादरं सम्पूज्य आह - सखे चित्रग्रीव ! सर्वथाऽत्र जालबन्धनविधौ सति दोषमाशङ्क्य आत्मनि अवज्ञा न कर्तव्या ।

इति प्रबोध्य आतिथ्यं कृत्वा आलिङ्ग्य च तेन संप्रेषितश्चित्रग्रीवोऽपि सपरिवारो यथेष्टदेशान् ययौ, हिरण्यकोऽपि स्वविवरं प्रविष्टः । अथ लघुपतनकनामा काकः सर्ववृत्तान्तदर्शी साश्चर्यम् इदमाह - अहो हिरण्यक ! श्लाघ्योऽसि, अतोऽहमपि त्वया सह मैत्रीं कर्तुमिच्छामि, 'अतस्त्वं मां मैत्र्येणाऽनुग्रहीतुमर्हसि 'एतच्छ्रुत्वा हिरण्यकोऽपि विवराऽभ्यन्तरादाह - 'कस्त्वम् ? स ब्रूते लघुपतनकनामा वायसोऽहम् । हिरण्यको विहस्याऽऽह - का त्वया सह मैत्री ? किञ्चान्यत् - 'शत्रुपक्षो भवानस्माकम् । शत्रुणा सन्धिर्न विधेयः' ।

लघुपतनको ब्रूते - 'श्रुतं मया सर्वं, तथाऽपि ममैतावानेव संकल्पो यत् - त्वया सह सौहृदमवश्यं करणीयमिति' । अन्यथा अनाहारेणाऽऽत्मानं तव द्वारि व्यापादयिष्यामि इति । 'गुणैरुपेतो भवदन्यो मया कः सुहृत प्राप्तव्यः ?' इत्यादि । तद्वचनमाकर्ण्य हिरण्यको त्र्वर्हिनिःसृत्याऽऽह-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'आप्यायितोऽहं भवतामेतेन वचनामृते '। अनेन वचनक्रमेण तत् एकमपि दूषणं त्वयि न लक्ष्यते।

'तद्भवतु, भवतोऽभिमतमेव' इत्युक्त्वा हिरण्यको मैत्र्यं विधाय भोजनविशेषैर्वायसं सन्तोष्य विवरं प्रविष्टः। वायसोऽपि स्वस्थानं गतः। ततः प्रभृति तयोः अन्योऽन्याहारप्रदानेन कुशलप्रश्नैर्विश्रम्भालापैश्च कियान्कालोऽतिवर्तते। एकदा लघुपतनको हिरण्यकमाह - 'सखे ! वायसस्य कष्टतरलभ्याहारमिदं स्थानम्। तदेतत् परित्यज्य स्थानान्तरं गन्तुमिच्छामि'। हिरण्यको बूते - 'मित्र ! क्व गन्तव्यम् ? वायसो बूते - मित्र ! अस्ति सुनिरूपितं स्थानम्।

हिरण्यकोऽवदत् - किं तत् ? वायसः कथयति - अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः। तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराऽभिधानः कूर्मः सहजधार्मिकः प्रतिवसति। स च भोजनविशेषैर्मां संवर्धयिष्यति। हिरण्यकोऽप्याह - 'तत्किमत्रावस्थाय मया कर्तव्यम्। अतो मामपि तत्र नय। वायसोऽवदत् - 'एवमस्तु'। अथ वायसस्तेन मित्रेण सह विचित्रालापसुखेन तस्य सरसः समीपं ययौ। ततो मन्थरो दूरादेव लघुपतनकम् अवलोक्य उत्थाय यथोचितमातिथ्यं विधाय मूषिकस्याऽप्यतिथिसत्कारं चकार।

वायसोऽवदत् - 'सखे ! मन्थर ! सविशेषपूजामस्मै विधेहि, यतोऽयं पुण्यकर्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यकनामा मूषिकराजः, एतस्य गुणस्तुतिं जिह्वासहस्रद्वयेनाऽपि यदि सर्पराजः कदाचित् कर्तुं समर्थः स्यात्' इत्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान्। ततो मन्थरः सादरं हिरण्यकं सम्पूजितवान्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततो हिरण्यक आह - अस्माकं पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्त्याऽनुगृहीतः । अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः । मन्थरक आह - युष्माभिः अति संचयः कृतः, तस्यायं दोपः ।

यातु, किमिदानीमतिक्रान्तोपवर्णनेन । तत् - सखे ! सर्वदा त्वया सोत्साहेन भवितव्यम् । तदत्र सखे ! दशाऽतिशेपेण शान्तिः करणीया, एतदप्यतिकप्टं त्वया न मन्तव्यम् । किं बहुना ? विस्रम्भालापैर्मयैव सहाऽत्र कालो नीयताम् । इति श्रुत्वा लघुपतनको बूते - धन्योऽसि मन्थर ! सर्वथा आश्रयणीयोऽसि ।

तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः सन्तुप्टाः सुखं निवसन्ति स्म । अथ कदाचित् चित्राङ्गनामा मृगः केनापि त्रासितस्तस्त्राऽऽगतः । तत्पश्चादायान्तं भयहेतुं संभाव्य मन्थरो जलं प्रविप्टः, मूपिकश्च विवरं गतः, काकोऽपि उड्डीय वृक्षाग्रमारूढः । ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्न कोऽप्यवलम्बितः । पश्चात् तद्वचनादागत्य पुनः सर्वे मिलित्वा तत्रैवोपविप्टाः।

मन्थरेणोक्तम् - भद्र मृग ! कुशलं ते ? स्वेच्छया उदकाद्याहारोऽनुभूयताम् । अत्रावस्थानेन वनमिदं सनाथीक्रियताम् । चित्राङ्गो ब्रूते - लुब्धकत्रासितोऽहं शरणमागतः । ततश्च भवद्भिः सह मित्रत्वमिच्छामि, भवन्तश्च अनुकम्पयन्तु मैत्र्येण । मन्थर आह- तदत्र भवता स्वगृहनिर्विशेपेण स्थीयताम् । तच्छुत्वा मृगः सानन्दो भूत्वा कृतस्वेच्छाऽऽहारः पानीयं पीत्वा जलासन्नवटतरुच्छायायामुपविप्टः ।

अथ मन्थरो ब्रूते - सखे मृग ! केन त्रासितोऽसि ? अस्मिन्निर्जने वने

अथ मन्थरो ब्रूते - सखे मृग ! केन त्रासितोऽसि ? अस्मिन्निर्जने वने

कदाचित् किं व्याधाः सञ्चरन्ति ? मृगेण उक्तम् - 'अस्ति कलिङ्गविपये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रुक्माङ्गदो नाम नृपतिः, स च दिग्विजयव्यापारक्रमेण आगत्य चन्द्रभागानदीतीरे समावेशितकटको वर्तते, प्रातश्च तेनाऽत्रागत्य कर्पूरसरः समीपे भवितव्यम्' इति व्याधानां मुखात् किंवदन्ती श्रूयते, तदत्रापि प्रातरवस्थानं भयहेतुकमित्यालोच्य यथा कार्यं तथा आरभ्यताम् ।

तच्छ्रुत्वा कूर्मः सभयमाह - मित्र ! जलाशयान्तरं गच्छामि' काकमृगावपि उक्तवन्तौ - 'मित्र ! एवमस्तु' । हिरण्यको विमृश्याब्रवीत् - पुनर्जलाशये प्राप्ते मन्थरस्य कुशलम्, स्थले गच्छतोऽस्य का विधा ?

ततस्तद्धितवचनमवधीर्य महता भयेन विमुग्ध इव मन्थरः तत जलाशयमुत्सृज्य प्रचलितः । तेऽपि हिरण्यकादयः स्नेहादनिष्टं शङ्कमानास्तमनुजग्मुः । ततः स्थले गच्छन् केनापि व्याधेन वने पर्यटता स मन्थरः प्राप्तः, स च तं गृहीत्वा उत्थाय धनुषि वद्ध्वा 'धन्योऽस्मि' इत्यभिधाय भ्रमणक्लेशात् क्षुत्पिपासाकुलः स्वगेहाभिमुखं प्रयातः । अथ ते मृगवायसमूषिकाः परं विपादमुपगताः तमनुगच्छन्ति स्म । ततो हिरण्यक आह - 'अहो मे दुर्दैवम्' ।

इति वहु विलप्य चित्राङ्गलघुपतनकावाह- 'यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम् । तौ ऊचतुः - सत्वरं यथा कार्यमुपदिश । हिरण्यको बूते - 'चित्राङ्गो जलसमीपं गत्वा मृतमिवाऽऽत्मानं निश्चेष्टं दर्शयतु, काकश्च तस्योपरि स्थित्वा चञ्च्वा किमपि विलिखतु, नूनमनेन लुब्धकेन मृगमांसार्थिना तत्र कच्छपं परित्यज्य सत्वरं गन्तव्यम्, ततोऽहं मन्थरस्य वन्धनं छेत्स्यामि, सन्निहिते लुब्धके भवद्भ्यां पलायितव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततश्चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा तथाऽनुष्ठिते सति स व्याधः परिश्रान्तः पानीयं पीत्वा तरोरधस्तादुपविष्टः सन् तथाविधं मृगमपश्यत् । ततः कच्छपं जलसमीपे निधाय कर्तरिकामादाय प्रहृष्टमना मृगान्तिकं चलितः । अत्रान्तरे हिरण्यकेन आगत्य मन्थरस्य बन्धनं छिन्नम् । छिन्नबन्धनः कूर्मः सत्वरं जलाशयं प्रविष्टः। स च मृग आसन्नं तं व्याधं विलोक्योत्थाय द्रुतं पलायितः । प्रत्यावृत्य लुब्धको यावत् तरुतलमायाति तावत् कूर्ममपश्यन् अचिन्तयत् - "उचितमेवैतत् । ममाऽसमीक्ष्यकारिणः" । ततोऽसौ स्वकर्मवशात् निराशः कटकं प्रविष्टः, मन्थरादयश्च सर्वे मुक्ताऽऽपदः स्वस्थानं गत्वा यथासुखमास्थिताः ।

कठिनशब्दार्थाः

शाल्मलीतरुः = शाल्मलीवृक्षः । अवसन्नायाम् = व्यतीतायाम् । विकीर्य = विक्षिप्य । प्रच्छन्नः = अन्तरितः । विसर्पन् = उड्डीयमानः । कपोतान् = पारावतान् । निरूप्यताम् =विचार्यताम् । सदर्पम् = गर्वसहितम् । अवतीर्य = अवरुह्य । उपविष्टाः = निषण्णाः । अवलम्बिता = अवलम्बनं कृतवन्तः । कापुरुषलक्षणम् = अधीरनरचिन्हम् । प्रतीकारः = दुःखनिवर्तनोपायः । उत्पतिताः = उड्डीनाः । चक्षुर्विषयम् = नेत्रग्राह्यताम् । अतिक्रान्तेषु = अतीत्यगतेषु । पाशाँश्छेत्स्यति = जालबन्धनानि कर्तिष्यति । अपायशङ्कया = नाशसन्देहेन । प्रत्यभिज्ञाय = ज्ञात्वा । ससम्भ्रमम् = सत्वरम् । श्लाघ्यः = प्रशंसनीयः । अनुग्रहीतुम् = अनुग्रहं कर्तुम् । व्यापादयिष्यामि = हन्मि । विश्रम्भालापैः = विश्वासवचनैः । धुरीणः = धुरन्धरः । अतिक्रान्तोपवर्णनेन = व्यतीतविषयचर्चया । त्रासितः = भयं प्रापितः । सनाथीक्रियताम् =

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अलङ्घियताम् । अनुकम्पयन्तु = अनुगृह्णन्तु । स्वगृहनिर्विशेषेण = आत्मगेहसामान्यभावेन । कलिङ्गविषये = कलिङ्गदेशे । समावेशितकटक: = स्थापितशिविर: । आलोच्य = विचार्य । अवधीर्य = तिरस्कृत्य ।

कोश:

१. "स्थिरायु: शाल्मलिर्द्वयो:" इत्यमर: ।

२. "विशङ्कटं पृथुवृहद्विशाल" मित्यमर: ।

३. "कृतान्तो यमुनाभ्राता शमनो यमराड् यम:" इत्यमर: ।

४. "पारावत: कलरव: कपोतोऽथे" त्यमर: ।

५. "स्व: श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् " इत्यमर: ।

६. "वार्ता प्रवृत्तिर्वृत्तान्त उदन्तस्या" दित्यमर: ।

७. "संकल्प: कर्ममानस" मित्यमर: ।

८. "कूर्मे कमठकच्छपौ" इत्यमर: ।

व्याकरणम्

- नानादिग्देशात् = दिशश्च देशाश्च दिग्देशम् (समाहार-द्वन्द्व:), नाना च तत् दिग्देशं, तस्मात् (कर्मधारय समास:) ।

- अस्ताचलचूडाऽवलम्बिनि = अस्तश्चाऽसौ अचल: (क.धा.) । तस्य चूडा (ष.त.) । अस्ताचलचूडाम् अवलम्बते तच्छील:, अस्ताचलचूडाबलम्बी, तस्मिन् । अस्ताचलचूडा + अब + लम्ब + णिनि + ङि (उपपद स.) ।

अनिष्टदर्शनं = न इष्टम् अनिष्टम् (नञ्.) अनिष्टस्य दर्शनम् (ष. त.)

विपयिणां = विपया: सन्ति येषां विषयिण:, तेषां, विपय+ इनि: ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रच्छन्नः = प्र + छद् = क्तः ।

विसर्पन् = वि+ सृप् + लट् (शतृ)

सदर्पं = दर्पेणसहितं यथा स्यात् तथा (तुल्ययोगबहु.)

कपोताऽवपातभयात् = कपोतानाम् अवपातः (ष.त.) तस्मात् भयं तस्मात् प.त.)

आश्रितवात्सल्येन = आश्रितेषु वात्सल्यं, तेन (स. त.)

सर्ववृत्तान्तदर्शी = सर्वश्चासौ वृत्तान्तः (क. धा.) सर्ववृत्तान्तं पश्यति तच्छीलः, सर्ववृत्तान्त + दृश् + णिनिः, (उपपद.)

कष्टतरलभ्याहारम् = अतिशयेन कष्टं कष्टतरं, (कष्ट + तरप्) तेन लभ्यः (तृ.त.) तादृश आहारो यस्मिन् तत् (बहु.) ।

कर्पूरगौराऽभिधानं = कर्पूरगौरमिति अभिधानं यस्य तत् (बहु.)

चिरकालोपार्जितः = चिरं चासौ कालः (क. धा.) चिरकालात् उपार्जितः (प.त.)

स्वेच्छाहारविहारं = स्वस्य इच्छा (ष. त.) आहारश्च विहारश्च आहारविहारम् (समाहार द्वन्द्वः) स्वेच्छया आहारविहारम् (तृ.त.)

सनाथीक्रिताम् = असनाथं सनाथं यथा सम्पद्यते तथा क्रियताम् । सनाथ+कृ+च्वि+लोट्+त) । कर्मवाच्यप्रयोगः ।

स्वगृह निर्विशेषेण. = स्वस्य गृहम् । प. त.) । निर्गतो विशेषो यस्मात् । बहु.) स्वगृहात् निर्विशेषेण (प.त.)

जलासन्नवटतरुच्छायायां = जलस्य आसन्नः (ष.त.) । वटश्चासौ तरुः । कर्म.) जलासन्नश्चासौ वटतरुः । क.धा.) तस्य छाया तस्याम् (प.त.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दिग्विजयव्यापरक्रमेण = दिशां विजयः (ष.त.) । तस्य व्यापारः (ष.त.) । दिग्विजयव्यापारस्य क्रमः, तेन (ष.त.)

मृगमांसार्थिना = मृगस्य मांसम् (ष.त.) । तत् अर्थयते तच्छीलो मृगमांसार्थी, तेन

(उपपद.) ।

असमीक्ष्यकारिणः = समीक्ष्य करोतीति समीक्ष्यकारी, समीक्ष्य+कृ+ णिनिः (उपपद.) । न समीक्ष्यकारी, तस्य (नञ्.) ।

शिक्षाः

साधनरहिताः, वित्तहीनाः, उपायशून्या अपि बुद्धिमन्तो जनाः परस्परं मिलित्वा बुद्ध्या काककूर्ममृगमूषिकबत् शीघ्रं कार्याणि साधयितुं समर्था भवन्तीति ।

अभ्यासः

प्रश्नाः

१. चित्रग्रीवंहिरण्यककथामधीत्य निम्नस्थानां प्रश्नानामुत्तराणि लिखत

क. गोदावरीतीरे किमस्ति ?

ख. लघुपतनक इति कस्य नाम ?

ग. कपोतस्याभिधानं किम् ?

घ. सर्वैः पक्षिभिरेकचित्तीभूय किं कृतम् ?

ङ. चित्रवने को निवसति ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च. " आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिवेदिनां सम्मतम् " इति कस्योक्तिः ?

छ. सहज-धार्मिकः कोऽस्ति ?

ज. राजा किमर्थमागत्य कुत्र समावेशितकटको वर्तते ?

झ. व्याधः कच्छपं जलसमीपे निधाय कस्यान्तिकं गतवान् ?

ञ. व्याधः प्रत्यावृत्य कूर्ममपश्यन् किमचिन्तयत् ?

२. विग्रहं प्रदर्शयत

अस्ताचलचूडाऽवलम्बिनि, कपोताऽवपातभयात्, आश्रितवात्सल्येन, सर्ववृत्तान्तदर्शी, विचित्रालापसुखेन ।

३. स्वकीयवाक्येषु प्रयोगं कुरुत

निर्जने वने, क्रियताम्, प्रत्यभिज्ञाय सविस्मयं, हिरण्यकः ।

४. पर्यायशब्दान् लिखत

सदर्पम्, सत्वरम्, अनुग्रहीतुम्, सुनिरूपितम्, अमृतेन ।

५. सन्धिविच्छेदं कुरुत

सोऽस्माकम्, एतच्छ्रुत्वा, किञ्चान्यत्, तत्रागत्य, तस्यायम् ।

६. चित्रग्रीवहिरण्यककथायाः सारांशं प्रदर्शयत ।

७. अनया कथया कीदृशी शिक्षा प्राप्यते ? लिखत ।

८. परस्परं मेलयत

क. कपोताः क: छेत्तुम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ख.	बन्धनं	ख.	स्थानम् ।
ग.	चित्रग्रीवः	ग.	न मन्तव्यम् ।
घ.	सुनिरूपितं	घ.	उपविष्टाः ।
ङ.	त्वया	ङ.	उवाच ।

=o=

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दशमपाठः

वृद्धव्याघ्रपथिकयोः कथा:

एको वृद्धो व्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते- " भो भोः पान्थाः! इदं सुवर्णकङ्कणं गृह्यताम् " । ततो लोभाकृष्टेन केनचित् पान्थेन आलोचितम्- भाग्येन एतत् संभवति, किन्तु अस्मिन् आत्मसन्देहे प्रवृत्तिर्न विधेया ।

किन्तु सर्वत्राऽर्थार्जनप्रवृत्तौ सन्देह एव । तन्निरूपयामि तावत् । प्रकाशं ब्रूते - " कथं तव कङ्कणम् " ? व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थोऽवदत्- कथं मारात्मके त्वयि विश्वासः ? व्याघ्र उवाच श्रृणु रे पान्थ ! प्रागेव यौवनदशायामहम् अतीव दुर्वृत्त आसम्, अनेकगोमानुषाणां वधात् मे पुत्रा मृता दाराश्च, वंशहीनश्चाहम् । ततः केनचिद्धार्मिकेणाहमुपदिष्टः- " दानधर्मादिकं चरतु भवान् " इति । तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो न कथां विश्वासभूमिः ?

मम चैतावान् लोभविरहः येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद् दातुमिच्छामि, तथापि " व्याघ्रो मानुषं खादति " इति लोकप्रवादो दुर्निवारः । मया च धर्मशास्त्राणि अधीतानि । त्वं च अतीव दुर्गतः, तेन तत्तुभ्यं दातुं सयत्नोऽहम् ।

तदत्र सरसि स्नात्वा सुवर्णकङ्कणमिदं गृहाण । ततो यावदसौ तद्वचःप्रतीतः लोभात् सरः स्नातुं प्रबिष्टः तावत महापङ्के निमग्नः पलायितुमक्षमः । तं पङ्के पतितं दृष्टवा व्याघ्रोऽवदत - अहह ! महापङ्के पतितोऽसि ! अतस्त्वामहमुत्थापयामि" इत्युक्त्वा शनैः शनैरुपगम्य तेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याघ्रेण धृतः स पान्थोऽचिन्तयत्- तन्मया भद्रं न कृतम्, यदत्र मारात्मके विश्वासः कृतः । इति चिन्तयन् एवाऽसौ व्याघ्रेण धृत्वा व्यापादितः खादितश्च।

कठिनशब्दार्थाः

आलोचितं = विचारितम् । प्रकाशम् = श्रव्यं यथा स्यात्तथा ।

कङ्कणम् = करभूपणम् । मारात्मके = घातकस्वभावे ।

यौवनदशायां = तारुण्याऽवस्थायाम् अनेकगोमानुपाणां = बहुधेनुमनुप्याणाम्।

विश्वासमूमिः = विश्वासपात्रम् । लोभविरहः = लोलुपताऽभावः ।

दुर्निवारः = दुरपनेयः । अधीतानि = पठितानि ।

दुर्गतः = दरिद्रः । सयत्नः = प्रयत्नयुक्तः ।

प्रतीतः = प्रसन्नः । महापङ्के = कर्दमराशौ ।

उपगम्य = समीपं गत्वा धृतः = गृहीतः ।

भद्रं = कल्याणम् । व्यापादितः = हतः ।

कोशः

१. " भार्या जायाऽथ पुंभूम्नि दाराः " इत्यमरः ।

२. " तारुण्यं यौवनं समे " इत्यमरः ।

३. " निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः " इत्यमरः ।

४. "कंङ्कणं करभूपण" मित्यमरः ।

व्याकरणम

कुशहस्तः = कुशा हस्ते यस्य सः (व्यधि.बहु.)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सरस्तीरे = सरसः तीरं, तस्मिन् (ष.त.)।

पान्थाः = पन्थानं नित्यं गच्छन्तीति, पथिन्+अण्।

लोभाकृष्टः = लोभेन आकृष्टः, तेन (तृ. त.)

मारात्मके = मार आत्मा यस्य स मारात्मकः, तस्मिन् (बहु.)

यौवनदशायां = यौवनम् एव दशा, तस्याम् (क.धा)

अनेकगोमानुषाणां = गावश्च मानुषाश्च गोमानुषाः (द्वन्द्वः)। अनेके च ते गोमानुषाः तेषाम् (क.धा.)

गलितनखदन्तः = नखाश्च दन्ताश्च नखदन्तम् (समा.द्व.)। गलितं नखदन्तं यस्मात् सः (बहु)।

व्यापादितः = बि+आङ्+पद+णिच्+क्तः।

शिक्षा

पण्डितोऽपि लोभाकृष्टचेताः, यथा न किञ्चिदपि विचारयितुं शक्नोति तथैव अतिलोभितया मूढहृदयः अविश्वस्तेष्वपि विश्वासङ्कृत्वा महद् दुखं प्राप्नोति। अतएव अतिलोभो न कर्तव्य इति।

अभ्यासः

प्रश्नाः

१. वृद्धव्याघ्रपथिककथामधीत्य निम्नस्थानां प्रश्नानामुत्तराणि लिखत-

क. वृद्धव्याघ्रः कुत्र आसीत् ?

ख. अर्थार्जनप्रवृत्तौ सर्वत्र किं भवति ?

ग. व्याघ्रेण धृतः पान्थः किमचिन्तयत् ?

घ. पथिकः केन व्यापादितः ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. विग्रहं प्रदर्शयत

कुशहस्तः, लोभाकृष्टः गलितनखदन्तः, अनेकगोमानुषाणाम् ।

३. स्वकीयवाक्येषु प्रयोगं कुरुत

सुवर्णकङ्कणम्, आत्मसन्देहे, प्रसार्य, लोभविरहः, प्रविष्टः ।

४. पर्यायशब्दान् लिखत

पान्थेन, प्रागेव, चरतु, लोकापवादः, पलायितुम् ,

५. सन्धिविन्छेदं कुरुत

तन्मया, पान्थोऽवदत्, सयत्नोऽहम्, शनैरुपगम्य ।

६. एतां कथाम् अधीत्य भवता कीदृशी शिक्षा प्राप्ता ? विलिख्यताम् ।

७. परस्परं मेलयत

क. लोभाकृष्टेन	क.उपगम्य ।
ख. व्याधः	ख.सुवर्णकङ्कणम् ।
ग. शनैः	ग.पान्थेन ।
घ. इदं	घ.ब्रूते ।

एकादशः पाठः

चित्राङ्गक्षुद्रबुद्धिसुबुद्धिकथा

अस्ति मगधदेशे चम्पकवती नाम अरण्यानी । तस्यां चिरात् महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचित् श्रृगालेनाऽवलोकितः । तं दृष्ट्वा श्रृगालोऽचिन्तयात्- " आः ! कथमेतन्मांसं सुललितं भक्षयामि ! भवतु विश्वासं तावदुत्पादयामि " इत्यालोच्य उपसृत्याऽब्रवीत् - " मित्र कुशलं ते ? " मृगेणोक्तम्- कस्त्वम् ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स ब्रूते- क्षुद्रवुद्धिनामा जम्बुकोऽहम् । अत्राऽरण्ये वन्धुहीनो मृतवत् एकाकी निवसामि, इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि, अधुना तवाऽनुचरेण मया सर्वथा भवितव्यमिति "। मृगेणोक्तम् - "एवमस्तु "।

ततः पश्चादस्तङ्गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ । तत्र चम्पकवृक्षशाखायां सुवुद्धिनामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काकोऽवदत् - सखे चित्राङ्ग ! कोऽयं द्वितीयः ? मृगो ब्रूते- " जम्बुकोऽयमस्मत्सख्यमिच्छन्नागतः "। काको ब्रूते- मित्र ! अकस्मादागन्तुना सह मैत्री न युक्ता, तन्न भद्रमाचरितम् ।

इत्याकर्ण्य स जम्बुकः सकोपमाह- " मृगस्य प्रथमदर्शनदिने भवानपि अज्ञातकुलशील एव आसीत् । तत् कथं भवता सह एतस्य स्नेहाऽनुवृत्तिरुत्तरोत्तरं वर्द्धते ? यथा चाऽयं मृगो मम बन्धुस्तथा भवानपि । मृगोऽब्रवीत् - किमनेन उत्तरोत्तरेण ? सर्वैरेकत्र विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम् "।

काकेनोक्तम् - "एवमस्तु"। अथ प्रातः सर्वे यथाऽभिमतदेशं गताः । एकदा निभृतं श्रृगालो ब्रूते- "सखे मृग ! एतस्मिन्नेव वनैकदेशे सस्यपूर्णं क्षेत्रमस्ति, तदहं त्वां तत्र नीत्वा दर्शयामि "। तथा कृते सति मृगः प्रत्यहं तत्र गत्वा सस्यं खादति । ततो दिनकतिपयेन क्षेत्रपतिना तद् दृष्ट्वा पाशास्तत्र योजिताः । अनन्तरं पुनरागतो मृगस्तत्र चरन् पाशैर्बद्धोऽचिन्तयत्- " को मामितः कालपाशादिव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः ? अत्रान्तरे जंम्बुकस्तत्राऽगत्य उपस्थितोऽचिन्तयत्- " फलितस्तावदस्माकं कपटप्रबन्धः, मनोरथसिद्धिरपि बाहुल्यान्मे भविष्यति । यत एतस्य उत्कृत्यमानस्य मांसाऽसृग्लिप्तानि अस्थीनि मया अवश्यं प्राप्तव्यानि, तानि च बाहुल्येन मम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भोजनानि भविष्यन्ति । स च मृगस्तं दृष्ट्वा उल्लसितो ब्रूते - " सखे ! छिन्धि तावन्मम बन्धनम्, सत्वरं त्रायस्व माम्।

जम्बुकः पाशं मुहुर्मुहुर्विलोक्याऽचिन्तयत् " दृढस्तावदयं बन्धः " ब्रूते च - सखे ! स्नायुनिर्मिताः एते पाशाः, तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि ? मित्र ! यदि चित्ते न अन्यथा मन्यसे, तदा प्रभाते यत् त्वया वक्तव्यं तत् कर्तव्यम् " इति ।

अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्य इतस्ततोऽन्विष्यन् तथाविधं दृष्ट्वा उवाच - सखे ! 'किमेतत् ? मृगेणोक्तम् - "अवधीरितसुहृद्वाक्यस्य फलमेतत् ।" काको ब्रूते - स वञ्चकः क्वाऽऽस्ते ? मृगेणोक्तम् - मन्मांसार्थी तिष्ठत्यत्रैव । काको ब्रूते - मित्र ! उक्तमेव मया पूर्वम् ।

अथ प्रभाते स क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशम् आगच्छन् काकेनाऽवलोकितः । तमवलोक्य काकेनोक्तम् - सखे मृग ! त्वमात्मानं मृतवत्सन्दर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ, अहं तव चक्षुषी चञ्च्वा किमपि विलिखामि, यदा अहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे । मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः, अथाऽसौ 'आः स्वयं मृतोऽसि !' इत्युक्त्वा मृगं बन्धनात् मोचयित्वा पाशान् संवरीतुं (संग्रहीतुं) सत्वरो बभूव । कियद्दूरे अन्तरिते क्षेत्रपतौ स मृगः काकस्य शब्दं श्रुत्वा सत्वरमुत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना प्रकोपात् क्षिप्तेन लगुडेन श्रृगालो व्यापादितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कठिनशब्दार्थाः

भ्राम्यन् = भ्रमणं कुर्वन् । सुललितम् = अतिसुन्दरम् । उपसृत्य = निकटं गत्वा । श्रृगालः = जम्बुकः । अनुचरेण = अनुगतेन । आसाद्य = प्राप्य । सवितरि = सूर्ये । चिरमित्रम् = प्राचीनः सखा । आगन्तुना = अतिथिना । आचरितम् = अनुष्ठितम् । आकर्ण्य = श्रुत्वा । अज्ञातकुलशीलः = अविदितवंशवृत्तः । स्नेहाऽनुवृत्तिः = प्रेमाऽनुवर्तनम् । स्थीयताम् = अवस्थानं क्रियताम् । यथाऽभिमतदेशम् = निजसंमतस्थानम् । निभृतम् = एकान्तं यथा तथा । योजिताः = स्थापिता । कालपाशात् = मृत्युबन्धनात् । कपटप्रबन्धः = छद्माचरणम् । उत्कृत्यमानस्य = सन्छिद्यमानस्य । अस्थीनि = कीकसानि । स्नायुनिर्मिताः = वस्नसारचिताः । भट्टारकवारे = सूर्यवासरे । प्रदोषकाले = रजन्यारम्भसमये । अवधीरितसुहृद्वाक्यस्य = तिरस्कृतमित्रवचनस्य । वञ्चकः = प्रतारकः । संवरीतुं = संग्रहीतुम् ।

कोशः

१. "महारण्यमरण्यानी" इत्यमरः । २. "समौ विस्रम्भविश्वासौ" इत्यमरः ।

३. "गाढ-बाढ-दृढानि च" इत्यमरः । ४. " प्रदोषो रजनीमुखमित्यमरः ।

व्याकरणम्

भ्राम्यन् = भ्राम्यतीति (भ्रम+श्यन्+लट् (शतृ)) ।

मरीचिमालिनि = मरीचीनां मांला (प.त.) । सा अस्याऽस्तीति मरीचिमालीं, मरीचिमाला+इनिः तस्मिन्,

प्रथमदर्शनदिने = प्रथमं च तद्दर्शनं क.धा तस्य दिनं तस्मिन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उत्तरोत्तरम् = उत्तरात् उत्तरम् (प.त. ।

वनैकदेशे = एकश्चाऽसौ देशः एकदेशः (क.धा.) वनस्य एकदेशः, तस्मिन् ष.त.

मांसाऽसृग्लिप्तानि = मांसयुक्तम् असृक् मांसाऽसृक् (मध्यमपदलोपी.), तेन लिप्तानि (तृ.त.)

अवधीरितसुहद्वाक्यस्य = सुहृदो वाक्यं सुहृद्वाक्यम् (ष.त.) अवधीरितं च तत् सुहृद्वाक्यं, तस्य (क.धा.)

हर्षोत्फुल्ललोचनेन = उत्फुल्ले लोचने यस्य स उत्फुल्ललोचनः (बहु.) । हर्षेण उत्फुल्ललोचनः, तेन (तृ.त.) ।

शिक्षा

अपरीक्ष्य यस्मिन् कस्मिन्नपि विश्वासं न कुर्यात् तथा विश्वस्तेषु जनेषु विश्वासघातमपि न कुर्यात् । अपरीक्ष्य विश्वासाद् अतिविश्वासाद् वा चित्राङ्गेन महद् दुःखं तथा विश्वासघातात् क्षुद्रबुद्धिना मरणं प्राप्तमिति ।

अभ्यासः

प्रश्नाः

१. चित्राङ्गक्षुद्रबुद्धिसुबुद्धिकथायास्तात्पर्यं लिखत ।

२. अधः स्थितानां प्रश्नानामुत्तराणि लिखत

क. मृगकाकौ कुत्र निवसतः ?

ख. चम्पकवृक्षशाखायां कः निवसति स्म ?

ग. मृगेण सह समागतं जम्बुकं दृष्ट्वा काकः किमकथयत

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घ. मृगः कुत्र गत्वा प्रत्यहं किं खादति स्म ?

ङ. काकस्य शब्दं श्रुत्वा मृगः किं कृतवान् ?

३. विग्रहं प्रदर्शयत

मरीचिमालिनि, उत्तरोत्तरम्, हर्षोत्फुल्ललोचनेन, अवधीरितसुहृद्वाक्यस्य ।

४. स्वकीयवाक्येषु प्रयोगं कुरुत

सुललितम्, निवसामि, भद्रम, वद्धः, भोजनानि ।

५. पर्यायशब्दान् लिखत

अरण्ये, काकः, सत्वरम्, तिष्ठति, त्रातुम् ।

६. सन्धिविच्छेदं कुरुत

मृगेणोक्तम्, क्वाऽऽस्ते, मन्मांसार्थी, तदद्य, उद्दिश्य ।

७. परस्परं मेलयत

क. क्षुद्रबुद्धिनामा	क. सस्यम् ।
ख. प्रत्यहं	ख. प्राप्तव्यानि ।
ग. अस्थीनि	ग. योजिताः ।
घ. पाशाः	घ. जम्बुकः ।

=0=

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वादशपाठः

जरद्गवदीर्घकर्णकथाः

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकात् गलितनखनयनो जरदगवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तदवृक्ष॰ासिनः पक्षिणः स्वाऽऽहारात् किञ्चित् किञ्चिदुद्धृत्य तस्मै ददति, तेनाऽसौ जीवति, तेपां शावकरक्षां च करोति । अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुं तत्राऽऽगतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयात्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेन उक्तम्- " कोऽयमायाति ?" दीर्घकर्णो गृध्रमवलोक्य सभयमाह- "हा ! हतोऽस्मि " यतोऽयं मां व्यापादयिप्यति ।

अधुनाऽतिसन्निधाने पलायितुमक्षमः । तद्यथा भवितव्यं तथा भवतु, तावद् विश्वासमुत्पादयाऽस्य समीपमुपगच्छमि, इत्यालोच्य तमुपसृत्याब्रवीत्- आर्य त्वाम् अभिवन्दे " । गृध्रोऽवदत् - "कस्त्वम् ? " सोऽवदत्- " मार्जारोऽहम् " । गृध्रोब्रूते - " दूरमपसर नो चेद् हन्तव्योऽसि मया " । मार्जारो ऽवदत्- "श्रूयतां मद्वचनम्- ततो यद्यहं वध्यस्तदा हन्तव्यः " ।

गृध्रो ब्रूते - " ब्रूहि किमर्थमागतोऽसि ? सोऽवदत्- अहमत्र गङ्गातीरे नित्यस्नायी निरामिपाशी ब्रह्मचारी चान्द्रायणव्रतमाचरन् तिष्ठामि । युष्मान् " धर्मज्ञानरताः प्रेमविश्वासमभूमयः " इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति, अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञाः, यन्मामतिथिं हन्तुमुद्यताः ।

यदि धनं नास्ति तदा सुप्रीतेनाऽपि वचसा तावदतिथिः पूज्य एव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गृध्रोऽवदत्- मार्जारो हि मांसरुचि:, पक्षिशावकाश्च अत्र निवसन्ति: तेनाऽहमेवं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति, ब्रूते च- मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणम् अध्यवसितम, यत: परस्परं विवदमानानामपि धर्मशास्त्रणाम् - "अहिंसा परमो धर्म: " इत्यत्रैकमत्यम् ।

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थित: । ततो दिनेषु गच्छत्सु असौ पक्षिशावकानाक्रम्य स्वकोटरमानीय प्रत्यहं खादति । अथ येषामपत्यानि खादितानि, तै: शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जार: कोटरान्निसृत्य बहि: पलायित:। पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरमनेनैव शावका: खादिता इति (सर्वै: पक्षिभि:) निश्चित्य स गृध्रो व्यापादित: ।

कठिनशब्दार्था:

पर्कटीवृक्ष: = प्लक्षतरु: । कोटरे = निष्कुहे ।
दैवदुर्विपाकात् = भाग्य दुष्परिणामात् । गृध्र: = दाक्षाय्य: ।
शावकरक्षां = शिशुत्राणम् । उपसृत्य = उपगम्य ।
निरामिषाशी = त्यक्तामिषाशन: । वीतरागेण = विगतविषयाभिलाषेण।
अध्यवसितं = आचरितम् । समारब्धा = प्रारब्धा ।
पलायित: = पलायनं कृतवान् । निरूपयदभि: = निरूपणं कुर्वदभि:।

कोश:

१. "प्लक्षो जटी पर्कटीस्या" दित्यमर: ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. " पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः " इत्यमरः ।

३. "ओतुर्विडालो मार्जारो बृषदंशक आखुभुक् " इत्यमरः ।

४. "स्युरावेशिक आगन्तुरतिथिर्ना गृहागते " इत्यमरः ।

व्याकरणम्

दैवदुर्विपाकात् = दैवस्य दुर्विपाकः. तस्मात् (प.त.) ।

गलितनखनयनः = नखाश्च नयने च नखनयनं, गलितं नखनयनं यस्य सः (बहु.)

तद्वृक्षवासिनः = स चाऽसौ वृक्षस्तद्वृक्षः (क.धा.) तद्वृक्षे वसन्ति, तच्छीलाः, तद्वृक्ष+वस्+णिनिः (उपपद.)

निरामिषाशी = निरामिषम् अश्नाति तच्छीलः, निरामिष+अश्+णिनिः (उपपद.)

चान्द्रायणव्रतं = चान्द्रायणं च तद्व्रतं, तत् (क.धा.)

प्रेमविश्वासभूमयः = प्रेमा च विश्वासश्च (द्वन्द्वः) तयोः भूमयः (ष.त.) ।

विधावयोबृद्धेभ्यः = विद्या च वयश्च विद्यावयसी (द्वन्दः) ताभ्यां वृद्धाः (तृ.त.), तेभ्यः । अत्र "आख्यातोपयोगे " इति सूत्रेण पञ्चमी ।

वीतरागेण = वीतो रागो यस्मात्सः वीतरागः, तेन (बहु.)

शिक्षाः

अज्ञात कुलशीलस्य कस्यचिदपि वासो न द्यः । तादृशः पुरुषः यदि सुजनः स्यात् तर्हि भद्रमेव । परन्तु यदि दुर्जनः स्यात्तदा आपदेव प्राप्येत इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभ्यासः

प्रश्नाः

१. जरद्गवदीर्घकर्णकथामधीत्य निम्नस्थानां प्रश्नानामुत्तराणि लिखत ।

क. गृध्रस्य नाम किम् ?

ख. मार्जारः किमर्थं तरुकोटरे आगतवान् ?

ग. भयार्तैः पक्षिशावकैः किं कृतम् ?

घ. धर्मशास्त्राणामैकमत्यं कुत्र ?

ङ. पक्षिभिः किमर्थं गृध्रो व्यापादितः ?

२. विग्रहं प्रदर्शयत

दैवदुर्विपाकात्, तदवृक्षवासिनः, पक्षिशावकान्, शोकार्तैः ।

३. सन्धिविच्छेदं कुरुत

तत्राऽऽगतः, इत्यालोच्य, मद्वचनम्, प्रत्यहम् ।

४. स्वकीयवाक्येषु प्रयोगं कुरुत

पर्वते, अवलोक्य, नित्यस्नायी, स्थितः, शावकाः ।

५. पर्याशब्दान् लिखत

पक्षिणः, समयम्, निरामिषाशी, वीतरागेण, अपत्यानि ।

६. अनया कथया भवता प्राप्तं ज्ञानमुपवर्ण्यताम् ।

७. परस्परं मेलयत-

क. त्वाम्	क. नास्ति ।
ख. सः	ख. स्पृशति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग. धनं	ग.प्राप्तानि ।
घ. कर्णौ	घ.अभिवन्दे ।
ङ. शावकास्थीनि	ङ.अवदत् ।

=0=

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रयोदशपाठः

चूडाकर्णवीणाकर्णकथा

हिरण्यकनामा मूषको लघुपतनकनामानं वायसं कथयति-

अस्ति चम्पकाऽभिधानायां नगर्यां परिव्राजकाऽऽवसथः । तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति । स च भोजनाऽवशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तके अवस्थाप्य स्वपिति , अहं च तदन्नम् उत्प्लुत्य प्रत्यहं भक्षयामि । अनन्तरं तस्य प्रियसुहृद् वीणाकर्णो नाम परिव्राजकः समायातः, तेन सह नानाकथाप्रसङ्गाऽवस्थितो मम त्रासार्थ जर्जरवंशखण्डेन चूडाकर्णो भूमिमताडयत् । तं तथाविधं दृष्टवा वीणाकर्ण उवाच - " सखे ! किमिति मम कथाविरक्तोऽन्यासक्तो भवान् ? " चूडाकर्णेनोक्तम् - " भद्र ! नाहं विरक्तः, किन्तु पश्य ! अयं मूषिको ममाऽपकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति " वीणाकर्णो नागदन्तमवलोक्याह- " कथमयं मूषिकः स्वल्पवलोऽप्येतावद् दूरमुत्पतति ? तदत्र केनाऽपि कारणेन भवितव्यम् " ।

क्षणं विचिन्त्य परिव्राजकेनोक्तम् - "कारणञ्चात्र धनबाहुल्यमेव प्रतिभाति । " ततः खनित्रमादाय तेन परिव्राजकेन विवरं खनित्वा चिरसञ्चितं मम धनं गृहीतम् । ततः प्रभृति प्रत्यहं निजशक्तिहीनः सत्वोत्साहरहितः स्वाहारमप्युपपादयितुमक्षमः सत्रासं मन्दम् उपसर्पन् चूडाकर्णेनाऽवलोकितः ।

ततस्तेनोक्तम् - धनेन बलवाँल्लोको धनाद् भवति पण्डितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पश्यैनं मूषिकं व्यर्थं स्वजातिसमतां गतम् ॥ इति ॥

कठिनपदार्था:

परिव्राजकावसथ: = संन्यासिमठ:

खनित्रम् = खननसाधनम्

परिव्राजक: = संन्यासी

प्रत्यहम् = प्रतिदिनम्

नागदन्तके = भित्तिस्थकीलके

सत्वोत्साहरहित:=बलाध्यवसायरहित:

कथाविरक्त: = आलापवैराग्ययुक्त:

विवरम् = बिलम्

अन्यासक्त: = विषयान्तरचित्त:

सत्रासम् = सभयम्

उपसर्पन् = गच्छन्

अवलोकित: = दृष्ट: ।

व्याकरणम्

चम्पकाभिधानायाम् = चम्पका अभिधानं यस्या: सा तस्याम् (बहुव्रीहि:) ।

भोजनावशिष्टभिक्षान्नसहितम् = भोजनाद् अवशिष्टं भोजनावशिष्टं (ष.त.) भिक्षाया अन्नं भिक्षान्नं (ष.त.) भोजनावशिष्टं च तद् भिक्षान्नं= भोजनावशिष्टभिक्षान्नम् । (क.धा.त.)

जर्जरवंशखण्डेन = वशंस्य खण्ड: वंशखण्ड: (ष.त.) जर्जरश्चासौ वंशखण्ड: (कर्मधारय: तत्पुरुष:) तेन ।

सत्वोत्साहरहित: = सत्वस्य उत्साह: (ष.त.)। सत्वोत्साहेन रहित: सत्वोत्साहरहित: (तृ.त) ।

अवस्थाप्य = अव (उपसर्ग:) स्था (ष्ठा) धातु: क्त्वा (ल्यप्) प्रत्यय: ।

स्वपिति = स्वप् (धातु:) लट् (तिप्) (प्रत्यय:) ।

पात्रस्थं = पात्रे तिष्ठतीति, पात्र (उपपद) ष्ठा (धातु:) क: (प्रत्यय:) ।

परिव्राजक: = परिव्रजतीति, परि (उपसर्ग:) व्रज (धातु:) ण्वुल् (उक) प्रत्यय:।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कोषः

" भूर्भूमिरचलाऽनन्ता" इत्यमरः ।

प्रबन्धकल्पना कथा इत्यमरः ।

उन्दुरूर्मूषकोऽप्याखुः इत्यमरः ।

द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुषु इत्यमरः ।

शिक्षा

धनस्याधिकं महत्वं वर्तते । धनेनैव प्राणी उत्साहं बलञ्च बिभर्ति । अतो व्यर्थं धनव्ययो न कार्यः ।

अभ्यास

प्रश्नाः

१. निम्नाङ्कितानां प्रश्नानामुत्तराणि लिखत -

क. परिव्राजकाऽऽवसथः कुत्राऽस्ति ?

ख. परिव्राजको भिक्षापात्रं कुत्रावस्थापयति ?

ग. परिव्राजकाऽऽवसथे कः सयायातः ?

घ. चूडाकर्णो भूमिं किमर्थमताडयत् ?

ङ. मूषिकः किं भक्षयति ?

च. मूषिकः स्वल्पबलोऽपि कथं दूरमुत्पतति ?

छ. परिव्राजकेन खनित्रमादाय किं कृतम् ?

ज. मूषिकः कथं शक्तिहीनः सञ्जात ?

झ. परिव्राजकेन मूषिकः कीदृशोऽवलोकितः ?

ञ. अनया कथया का शिक्षा लभ्यते ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. संक्षेपतोऽस्याः कथायाः सारांशं लिखत ।

३. निम्नाङ्कितानां पदानां विग्रहं कुरुत

भिक्षापात्रम्, त्रासार्थम्, कथाविरक्तो, प्रत्यहं, निजशक्तिहीनः ।

४. सन्धिविच्छेदं कुरुत

स्वल्पबलोऽप्येतावत्, परिव्राजकेनोक्तम्, वीणाकर्ण उवाच, तदत्र, केनापि ।

५. पर्यायान् लिखत

[illegible]ंशखण्डः, आवसथः, सुहृद्, धनम्, मूषिकः विवरम् ।

६. प्रकृतिप्रत्ययौ विश्लेषयत

स्वपिति, अवलोकितः, भवितव्यम्, उत्प्लुत्य, उक्तम् ।

७. परस्परं मेलयत

क. वीणाकर्णः	क.उक्तम्
ख. विवरम्	ख.भवितव्यम्
ग. चूडाकर्णेन	ग.खनित्वा
घ. सञ्चितम्	घ.आह
ङ. कारणेन	ङ.धनम् ।

=०=

चतुर्दशपाठः

भैरवव्याधदीर्घरावजम्बुककथा

आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मांसलुब्धो धनुरादाय मृगमन्विष्यन् विन्ध्याटवीमध्यं गतः । तत्र तेन मृग एको व्यापादितः । ततो मृगमादाय गच्छता तेन घोराकृतिः शूकरो दृष्टः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततस्तेन मृगं निधाय शूकरः शरेण हतः । शूकरेणागत्य प्रलयघनघोरगर्जनं कुर्वाणेन च मुष्कदेशे हतः छिन्नद्रुम इव पपात ।

अथ तयोः पादास्फालनेन एकः सर्पोऽपि मृतः अत्रान्तरे दीर्घरावो नामं जम्बुकः परिभ्रमन्नाहारार्थी मृतान् तान् मृगव्याध- सर्पशूकरानपश्यत् । आलोक्याचिन्तयच्च- " अहो भाग्यम् !! अद्य महद्भोज्यं समुपस्थितम् । " भवतु, एषां मांसैर्मासत्रयं ममाधिकं भोजनं भविष्यति।

ततः प्रथमबुभुक्षायामिदं निःस्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि। इत्युक्त्वा तथाऽकरोत् । ततश्छिन्ने स्नायुबन्धने द्रुतम् उत्पतिनेन धनुषा हृदि निर्भिन्नः स दीर्घरावः पञ्चत्वं गतः । ॥ इति ॥

कठिनपदार्थाः

व्यापादितः = मारितः

घोराकृतिः = भयङ्कराकारः

शूकर = वराहः

छिन्नद्रुमः = कृत्तवृक्षः

पादास्फालनेन = चरणप्रक्षेपेण

आलोक्य = दृष्ट्वा

कोदण्डलग्नम् = धनुषि बद्धम्

स्नायुबन्धनम् = वस्नसाबन्धनम्

द्रुतम् = शीघ्रम्

पञ्चत्वं गतः = मृतः

निर्भिन्नः = विदारितः

हृदि = हृदये ।

व्याकरणम्

कल्याणकटवास्तव्यः - कल्याणकटके वास्तव्यः (स.त.)

घोराकृतिः = घोरा आकृतिर्यस्य सः (बहुब्रीहिः)

प्रलयघनघोरगर्जनं - प्रलयस्य घनः - प्रलयघनः (ष.त.)

घोरं च तद् गर्जनं घोरगर्जनं (क.धा.त.) प्रलयघनस्य इव

घोरगर्जनं प्रलयघनघोरगर्जनम् (ष.त.)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृगव्याधसर्पशूकरान्-मृगश्च व्याधश्च सर्पश्च शूकरश्च
मृगव्याधसर्पशूकराः तान् (द्वन्द्वः)

पपात - पत् (धातुः) लिट् (तिप्-णल्) प्रत्ययः ।

आहारार्थी - आहारम् अर्थयते तच्छीलः - आहार+अर्थ+णिनि.

निर्भिन्न - निर् (उपसर्गः) भिद् (धातुः) क्तः (प्रत्ययः)

अकरोत् - कृ (धातुः) लङ् (तिप्) प्रत्ययः ।

कोषः

मुष्कः- "मुष्कोऽण्डकोशो वृषण": इत्यमरः ।

शूकरः - "वराहः सूकरो घृष्टि": इत्यमरः ।

(तालव्या अपि दन्त्याश्च शम्वशूकरपांशवः)

स्नायुः = "वस्नसा स्नायुः स्त्रियाम्" इत्यमरः ।

कोदण्डम् - "धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् "इत्यमरः ।

शिक्षा

आवश्यकानां वस्तूनामेव संग्रहः करणीयः न ततोऽधिकः । अतएव - महाभारते कथितमस्ति-

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥ इति ।

यावद् आवश्यकं ततोऽधिकं वस्तु यदि संचेतुं चेष्ट्यते तदा अनयोर्गतिर्भवति। यथा - अधिकसञ्चयार्थी भैरवो व्याधः दीर्घरावो जम्बुकश्चोभावपि मृत्युमापन्नौ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अभ्यासः

प्रश्नाः

१. निक्नाङ्कितानां प्रश्नानामुत्तराणि लिखत -

क. भैरवः कोऽस्ति ? कुत्र च वसति ?

ख. भैरवः कुत्र किमर्थं गतः ?

ग. भैरवेण कः व्यापादित ?

घ. भैरवं को हतवान् ?

ङ. सर्पः केन प्रकारेण मृतः ?

च. जम्बुकः किमपश्यत् ?

छ. दीर्घरावः किमचिन्तयत् ?

ज. दीर्घरावः कथं पञ्चत्वं गतः ?

झ. अनया कथया का शिक्षा प्राप्यते ?

२.अस्याः कथायाः सारं लिखत ।

३. निम्नाङ्कितपदानां विग्रहं कुरुत

मांसलुब्धः, छिन्नद्रुमः, मासत्रयम्, कोदण्डलग्नम्, स्नायुबन्धनम् ।

४. सन्धिविच्छेदं कुरुत

धनुरादाय, चैकदा, सर्पोऽपि, परिभ्रमन्नाहारार्थी, इत्युक्त्वा ।

५. प्रकृतिप्रत्ययौ विश्लेषयत- व्यापादितः, आदाय, पपात, आलोक्य, गतः ।

६. पर्यायान् लिखत- व्याधः, धनुः, मृगः, सर्पः, शूकरः, कोदण्डम्

७. परस्परं मेलयत

क. भैरवः	क. दीर्घरावः
ख. जम्बुकः	ख. खादामि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग. धनुषः ग. व्याध:

घ. स्नायुबन्धनम् घ. पपात

ङ. छिन्नद्रुम इव ङ. निर्भिन्न: । ॥ इति ॥

=o=

पञ्चदशपाठः

कर्पूरतिलकहस्तिजम्बुककथा

अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती । तमवलोक्य सर्वे श्रृगालाश्चिन्तयन्ति स्म- " यद्ययं केनाप्युपायेन म्रियते, तदाऽस्माकम् एतेन देहेन मासचतुष्टयस्य स्वेच्छाभोजनं भवेत् । "

ततस्तन्मध्यादेकेन वृद्धश्रृगालेन प्रतिज्ञा कृता - " मया बुद्धि- प्रभावादस्य मरणं साधयितव्यम., अनन्तरं स वञ्चक: कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच- देव ! दृष्टिप्रसादं कुरु ।"

हस्ती ब्रूते- " कस्त्वम् ? कुत: समायात: ? " सोऽवदत् - " जम्बुकोऽहं, सर्वैर्वनवासिभि: पशुभिर्मिलित्वा भवत्सकाशं प्रस्थापित:, यद्विना राज्ञा स्थातुं न युक्तम्, तदत्राऽटवीराज्येऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपित: ।

तद्यथा लग्नवेला न चलति तथाकृत्वा सत्वरमागम्यतां देवेन । इत्युक्त्वा उत्थाय चलित: । ततोऽसौ राज्यलोभाऽऽकृष्ट: कर्पूरतिलक: श्रृगालदर्शितवर्त्मना धावन् महापङ्के निमग्न: । हस्तिना उक्तम् - "सखे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रृगाल ! किमधुना विधेयम् ? महापङ्कपतितोऽहं म्रिये, परावृत्य पश्य !, श्रृगालेन विहस्य उक्तम् - " देव ! मम पुच्छाग्रे हस्तं दत्वा उत्तिष्ठ ", यस्मात् मद्विधस्य वचसि त्वया विश्वासः कृतः , तस्य फलमेतत् । तदनुभूयताम् अशरणं दुःखम् ।ततो महापङ्के निमग्नो हस्ती श्रृगालैर्भक्षितः ॥

कठिनपदार्थाः

हस्ती = गजः
वञ्चकः = प्रतारकः
दृष्टिप्रसादं कुरु = दर्शनस्य कृपां कुरु (विलोकय)
प्रस्थापितः = प्रेषितः
अटवी = वनम्
निरूपितः = निश्चितः
चलति = अतिक्रामति
सत्वरम् = शीघ्रम्
हस्तम् = शुण्डाम्
फलम् = परिणामः
अशरणम् = संरक्षकहीनम्
महापङ्कः = अधिककर्दमः
भक्षितः = खादितः
जम्बुकः = श्रृगालः
वर्त्म = मार्गः
निमग्नः = निपतितः

व्याकरणम्

मासचतुष्टयस्य- मासानां चतुष्टयं मासचतुष्टयम् (ष.त.) तस्य मासचतुष्टयस्य ।

बृद्धश्रृगालेन- वृद्धश्चासौ श्रृगालः, वृद्धश्रृगालः (क.धा.त.) तेन वृद्धश्रृगालेन ।

साष्टाङ्गपातम्- अष्टानां अङ्गानां पातः , अष्टाङ्गपातः (उत्तरपदः त.) अष्टाङ्गपातेन सहितं यथा स्यात्तथा साष्टाङ्गपातं (बहुव्रीहिः) क्रिया-विशेषणम्

सर्वस्वामिगुणोपेतः- स्वामिनो गुणाः स्वामिगुणाः (ष.त.) सर्वे च ते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वामिगुणाः = सर्वस्वामिगुणाः (कर्मधारय तत्पुरुषः) सर्वस्वामिगुणैरुपेतः सर्वस्वामिगुणोपेतः (तृ. त)

प्रस्थापितः= प्र (उपसर्गः) ष्ठा+णिच् (स्थापि धातुः) क्तः (प्रत्ययः)

अभिषेक्तुम् = अभि (उपसर्गः) सिच् (धातुः) तुमुन् (प्रत्ययः)

राज्यलोभाकृष्टः= राज्यस्य लोभः राज्यलोभः (ष.त.) राज्यलोभेन आकृष्टः राज्यलोभाकृष्टः (तृ.त.)

श्रृगालदर्शितवर्त्मना= श्रृगालेन दर्शितं = श्रृगालदर्शितं (तृ.त) श्रृगालदशितं च तद् वर्त्म = श्रृगालदर्शितवर्त्म (क.धा.त) तेन श्रृगालदर्शितवर्त्मना । उक्तम् - वच् (धातुः) क्तः (प्रत्ययः)

अनुभूयताम् = अनु (उपसर्ग) भू (धातुः) (कर्मणिप्रत्ययः) त (प्रत्ययः)

कोषः

सृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः " इत्यमरः ।

(श्रृगाल इति तालव्यदिरप्ययं शब्दः)

" शरणं गृहरक्षित्रोः " इत्यमरः ।

अटव्यरण्यं विपिनं गहनं काननं वनम् " इत्यमरः ।

" दन्ती दन्तावलो हस्ती " इत्यमरः ।

" अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः " इत्यमर : ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिक्षा

बलेन यत्कार्यं साधयितुं न शक्यते, तदपि कार्यं बुद्धया उपायेन च साधयितुं शक्यते । बुद्धिमान् बलवन्तमपि विजेतुं शक्नोति । यथा बुद्धिमता बलहीनेनापि श्रृगालेन बलवान्हस्ती व्यापादितः ।

अभ्यास

प्रश्नाः

१. निम्नलिखितानां प्रश्नानामुत्तराणि लिखत ।

क. कर्पूरतिलको हस्ती कुत्र वसति ?

ख. श्रृगाला हस्तिनमवलोक्य किमचिन्तयन् ?

ग. कस्य मांसेन श्रृगालानां कतिमासानां स्वेच्छाभोजनं भवेत् ?

घ. बृद्धश्रृगालेन किं प्रतिज्ञातम् ?

ङ. जम्बुको हस्तिनं किमवोचत् ?

च. वनवासिभिर्जम्बुको हस्तिपार्श्वे किमर्थं प्रस्थापितः ?

छ. कर्पूरतिलकः कुत्र निमग्नः ?

ज. पङ्के निमग्नः हस्ती श्रृगालं किमुक्तवान् ?

झ. श्रृगालः किं प्रत्युक्तवान् ?

ञ. अनया कथया का शिक्षा प्राप्यते ?

२. संक्षेपतोऽस्याः कथाया आशयं लिखत ।

३. निम्नाङ्कितानां पदानां विग्रहं कुरुत

महापङ्कपतितः, पुच्छाग्रम्, अशरणम्, अटवीराज्यम्, भवत्सकाशम्, दृष्टिप्रसादः, मासचतुष्टयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४. सन्धिविच्छेदं कुरुत

श्रृगालाश्चिन्तयन्ति, केनाप्युपायेन, अटवीराज्येऽभिषेक्तुम्, ततोऽसौ श्रृगालैर्भक्षितः ।

५. परस्परं मेलयत

क. कर्पूरतिलकः	क. उक्तम्
ख. विश्वासः	ख. निमग्नः
ग. श्रृगालेन	ग. हस्ती
घ. दुःखम्	घ. कृतः
ङ. महापङ्के	ङ. अनुभूयताम्

६. पर्यायान् लिखत

श्रृगालः महापङ्कः, हस्ती, अशरणम्, देवः, भवतिः ।

७. प्रकृतिप्रत्ययौ विश्लेषयत

ब्रूते, ततः, आकृष्टः, निरूपितः, धावन्, निमग्नः ।

-इति साहित्यप्रवेशिका-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रवेशिकापरीक्षा (संस्कृतभाषाप्रशिक्षणकार्यक्रमान्तर्गता)
२०५१

विषय : अनिवार्यसाहित्यम् पूर्णाङ्का : १००
पत्रम् – द्वितीयम् । समय : -घण्टात्रयम् ।

क) परीक्षार्थिभि : प्रश्नोत्तरं यथासम्भवं स्वकीयै:शब्दैर्लेखनीयम् ।
ख) दक्षिणपार्श्वे सन्निविष्टा अङ्का: पूर्णाङ्कान् द्योतयन्ति ।

१– अधस्तन प्रश्नानामुत्तराणि लिखत– ३०

(क) केषां विश्वासो न कर्तव्य : ?
(ख) पद्यगधकाव्ययो : को भेद: ?
(ग) मूढचित्तस्य कानि लक्षणानि ?
(घ) दुरात्ममहात्मनो: को भेद: ?
(ङ) कीदृशं मित्रं परिवर्जयेत् ?
(च) शास्त्रेषु कस्यौषधं विहितं नास्ति ?
(छ) पशुमानवयो : सामान्यलक्षणानि कानि ? कश्च तयोर्भेद :
(ज) काव्यस्य किं लक्षणम् ?
(झ) विधया सुखं कथं लभ्यते ?
(ञ) नीतिकाव्यस्य किं लक्षणम् ?

अथवा

(क) वाङ्मयस्य किं लक्षणम् ?
(ख) पद्यकाव्यस्य का परिभाषा ?
(ग) आख्यायिकाया: किं लक्षणम् ?
(घ) जन: सुपात्रत्वात् किं लभते ?
(ङ) पुंसां धिय: कदा मलिना भवन्ति ?
(च) कुत्र विश्वासो न विधेय: ?
(छ) रगणस्य किं स्वरुपम् ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ज) उपेन्द्रवज्रया : किं लक्षणम् ?
(झ) वंशस्थेन्द्रवज्राया: किं पार्थक्यम् ?
(ञ) शिखरिणी कुत्र कुत्र छिन्ना भवति ?

२– निम्नपद्यस्य खण्डान्वयं दण्डान्वयं वा लिखत– ५

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र चन्दनं न वने वने ॥

३– कस्यचिदेकस्य संस्कृतभाषायां नेपाल्यां वा व्याख्यां कुरुत– १०

(क) अजरामरवत्प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥
(ख) आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि ।
आत्मानं सततं रक्षेद् दारैरपि धनैरपि ॥

४. नेपाली-भाषायामर्थं लिखत ।

यौवनं धनसंपत्ति : प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥

५. सोदाहरणं वसन्ततिलकाच्छन्दसो लक्षणं लिखत १०

अथवा

येषां न विद्या न तपो न दानम्
ज्ञानं न शीलं न गुणो न धर्म : ।
ते मर्त्यलोके भुवि भारभूता:
मनुष्यरूपेण मृगाश्चरन्ति ।
कस्य छन्दस उदाहरणमिदम् ? सलक्षणं प्रकाशयत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनुष्यरूपेण मृगाश्चरन्ति ।

कस्य छन्दस उदाहरणमिदम् ? सलक्षणं प्रकाशयत ।

६– अधोलिखित-गद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत –

अस्ति भागिरथीतीरे गृघ्रकूटनाम्नि पर्वते महान् पर्कटीवृक्ष : । तस्य कोटरे दुर्दैवविपाकाद् गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः : स्वाहारात् किञ्चित्किञ्चिदुद्धृत्य ददति । तेनासौ जीवति । शावकानां रक्षणं करोति । अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुं तत्रागतः । तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहल : कृतः । तच्छुत्वा जरद्गवेनोक्तम्– कोऽ यमायाति । दीर्घकर्णो गृध्रमालोक्य सभयमाह –'हा हतोऽस्मि ।, अधुनास्य सन्निधाने पलायितु- मक्षमः । तद् यथा भवितव्यं तद् भवतु । तावद् विश्वासमुत्थाप्यास्य समीपमुपगच्छामि । इत्यालोच्योपसृत्याब्रबीत् –आर्य, त्वामभिवन्दे !

गृध्रोऽवदत् –"कस्त्वम् ।" सोऽवदत्"– मार्जारोऽहम् । गृधो ब्रूते– दूरमपसर, नोचेद् हन्तव्योऽसि ।

(क) पक्षिणः कुत्र निवसन्ति स्म ?
(ख) दीर्घकर्णः किमर्थमागतः ?
(ग) किमर्थं पक्षिशावकाः कोलाहलं कृतवन्तः?
(घ) गृध्रं विलोक्य माजरिण किं विचारितम् ?
(ङ) जरद्गव : कीदृश आसीत् ?

७ – विग्रहं प्रदर्शयत –

५

भागीरथीतीरे, तज्जीवनाय, गलितनखनयनः, दीर्घकर्ण :, पक्षिशावकान् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

८– स्वकीयवाक्येषु प्रयोगं कुरुत

५

श्रुत्वा, कोलाहलः , तत्र आयाति, भक्षयितुम् ।

९– पर्यायशब्दान् लिखत –

५

भयम्, अधुना, आलोच्य, उपगच्छामि, नो चेद् ।

१०– सन्धि विच्छेदं कुरुत –

५

इत्यालोच्य, गृध्रोऽवदत्, तद्वृक्ष : अधुनाऽस्य, तज्जोवनाय ।

११– परस्परं मेलयत–

५

(क)	(ख)
जरद्गवः	करोति
आयान्तम्	गृध्रः
कृतः	उद्धृत्य
किञ्चिद्	कोलाहल :
रक्षणम्	मार्जारम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रवेशिका–परीक्षा–(संस्कृत–भाषा–प्रशिक्षणकार्यक्रमान्तर्गता)
२०५२

विषय: अनिवार्य साहित्यम् ।
पूर्णाङ्का: १००

पत्रम्– द्वितीयम् ।
समय: घण्टात्रयम् ।

(क) परीक्षार्थिभि : प्रश्नोत्तरं यथासम्भवं स्वकीयै : शब्दैर्लेखनीयम् ।

(ख) दक्षिणपाशर्वे सन्निविष्टा अङ्का: पूर्णाङ्कान् द्योतयन्ति ।

१– अधस्तनप्रश्नानामुत्तराणि लिखत– ३०

(क) वाङ्मयस्य किं लक्षणम् ?
(ख) काव्यस्य कति भेदा: ? के च ते?
(ग) पात्रत्वं कथं लभ्यते ?
(घ) केन सह मैत्री न युक्ता ?
(ङ) केषां विश्वासो न कर्तव्य : ?
(च) पुंसां धिय: कदा मलिना भवन्ति ?
(छ) विधिर्बलवानित्यस्योदाहरणानि कानि ?
(ज) विधाऽलङ्कृतो दुर्जन: केन तुल्य: ?
(झ) पद्यकाव्यस्य किं लक्षणम् ?
(ञ) शस्त्रेषु कस्यौषधं वर्णितं नास्ति ?

अथवा

(क) काव्यस्य किं लक्षणम. ?
(ख) गद्यकाव्यस्य कति भेदा :?
(गं) विद्या किं ददाति ?
(घ) धीमतां काल: कथं गच्छति ?
(ङ) शास्त्रस्य कति भेदा: ?
(च) छन्द:शास्त्रे कति गणा भवन्ति ?
(छ) मगणस्य कीदृशं स्वरुपम ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ज) नीतिकाव्यस्य को विशेषः ?
(झ) मालिनीच्छन्दसः किं लक्षणम् ?
(ञ) शार्दूलविक्रीडितवृत्ते कुत्र कुत्र विरामो भवति ?

२– निम्नपद्यस्य खण्डान्वयं दण्डान्वयं वा लिखत – ५

रङ्कं करोति राजानं राजानं रङ्कमेव च ।
धनिनं निर्धनञ्चैव निर्धनं धनिनं विधिः ॥

३– कस्याचिदेकस्य संस्कृतभाषायां नेपाल्यां वा व्याख्यां कुरुत – १०

(क) पुण्यतीर्थे कृतं येन तपः क्वाप्यति दुष्करम ।
तस्य पुत्रो भवेद् वश्यः समृद्धो धार्मिकः सुधी : ॥

(ख) मनस्यन्यद् वचस्यन्यद् कर्मण्यन्यद् दुरात्मनाम् ।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ॥

४– नेपालीभाषायामर्थं लिखत – ५

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमांल्लोके यस्यार्थाः स हि पण्डित : ॥

५– सोदाहरणं शिखरिणीच्छन्दसो लक्षणं लिखत । १०

अथवा

प्रारभ्यते न खलु विघनभयेन नीचै :
प्रारभ्य विघ्नविहता विरमन्ति मध्या : ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारव्धमुत्तमजना न परित्यजन्ति ॥

कस्यच्छन्दस उदाहरणमिदम ? सलक्षणं प्रकाशयत ।

६– अधस्तनगद्यभागमधीत्य तदनुर्वर्तिनां प्रश्नानामुत्तरांणि लिखत– १५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection